॥ श्रीः ॥

ॐ नमः परमात्मने ॥

श्रीचक्रपाणिदत्तकृतस्य

प्रौढमनोरमाखण्डनग्रन्थस्य

प्रस्तावः ।

महर्षिपाणिनिप्रोक्तसूत्रपाठाध्यायस्तथा तद्व्याख्यानस्य महर्षि-पतञ्जलिकृतमहाभाष्यस्य एवं कौण्डिन्यवृत्तेः काशिकावृत्तेः भोजराजकृतसरस्वतीकण्ठाभरणाभिधवृत्तेरपि क्रममनादृत्य कैयटहरदत्ताद्याचार्याणां मतं च क्वचिदिखण्ड्य सिद्धान्तकौमुदीं तद्व्याख्यां च श्रीभट्टोजिदीक्षिताः प्रणीतवन्त इति नैव तिरोहितमस्ति विदुषाम् । किन्तु

"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः"(१) ॥

इति श्रुतौ दुर्गसिंहोक्तमवलम्ब्य श्रीचक्रपाणिदत्तेन प्रौढमनोरमाग्रन्थस्य खण्डनं कृतम् । एवं पण्डितसम्राड्जगन्नाथेनापि प्रौढमनोरमाकुचमर्दनाख्यं खण्डनं कृतमित्युभयोरन्वेषणे कृते मयैकं चक्रपाणिदत्तकृतप्रौढमनोरमाखण्डनपुस्तकं वाराणसीस्थराजकीयसंस्कृतपाठशालोयपुस्तकालये वर्तमानं विक्रमीय१८५९संवत्सरे लिखितम-

(१) तिमिङ्गिलो मत्स्यभेद इति अमरकोशे । राघवो मत्स्यभेदेऽपीति कोशः ।

लिशुद्धं समधिगतं मुद्रणद्वारा तत्प्रकाशने प्रवृत्तम्। अस्य ग्रन्थस्य ह
मालोचने कृते भट्टोजिदीक्षितपौत्रेण कृते शब्दरत्नग्रन्थे तदाख्या
बालभट्टापरनामधेयवैद्यनाथभट्टपायगुण्डेकृते भावप्रकाशे च "इ
खण्डनकारोक्तमपास्त" मित्यादि(१)दर्शनान्माननीयत्वेनास्मिन् ग्र
महासमादरः सञ्जात इति काशीविद्यासुधानिधिनामके ऽस्मि
मासिकपत्रे प्रकाशितः सन्नचिरेणैव सर्वेषां सुलभो भवेदित्येतदर्थं
मुद्रयितुमारब्धोऽधिकं तु समाप्ते मुद्रणे निरूपयिष्यामीति विरम्।

---

(१) दीर्घेत्युपलक्षणं यणोऽपि प्रत्यासत्त्या ऋन्निमित्तकार्यमात्रस्य तेन वारणात अत एवाह गुणेति। ऋतो ङीत्यनेनेति भावः। यत्तु गुणे तस्य स्थानिवत्त्वेन दीर्घो यणिति जगन्नाथादिस्तन्न तथा सति बाधकस्य जागरूकत्वात् पूर्वस्यैव स्थानिवत्त्व कच। एतेन गुणोत्तरमपीत्यादिखण्डनकृदादुग्रक्तिरपास्ता। वार्तिकस्य साधारणत्वाद्दाह भाष्ये चेति। सर्वत्रेत्युक्त्या तस्य प्रकृतिभावपरत्वेनावङ्परत्वमिति खण्डनकृदुक्ति परास्ता। खण्डनकारोक्तिं खण्डयितुमाह। तस्येति। चाक्रवर्मणस्येत्यर्थः। अनुस्व ञ्यत्वादितीति। एतेन नलोपं प्रति नुटोऽसिद्धत्वान्नुट् स्यादिति मूलोक्तं चिन्त्यमि खण्डनकारोक्तमपास्तम्। यत्तु प्रत्ययान्तपयुदासे कार्ये सुब्लोपनिमित्तप्रत्ययलक्ष नेत्यत्रेदं मानं विशेषापेक्षत्वात् एवंचाहनित्यत्र तिङ्लोपनिमित्तप्रत्ययलक्षणः तत्र कार्ये दुर्वारत्वेनाधातुरिति न कार्यमिति खण्डनकृत्। तत् खण्डयति। चेति। ज्ञापकमिति॥

U. C. C. BO बनारस
No ..... गवर्नमेण्टसंस्कृतकालेज पुस्तकालये
S. V. O. १७ फरवरी १९११ ई०।
S. V. Oriental Library, TIRUPATI Acc. No 9522 Date 17/11/69

} विन्ध्येश्वरीप्रसादद्विवेदि

ॐ नमः परमात्मने ।

भट्टोजिदीक्षितकृत—

सिद्धान्तकौमुद्या व्याख्यानस्य प्रौढमनोरमाग्रन्थस्य खण्डनम् ।

श्रीचक्रपाणिदत्तविरचितम् ।

विरोधिनां तिरोभावभव्यो यद्गारतीभरः ।
वटेश्वरं गुरुं शेषवंशोत्तंसं भजामि तम् ॥ १ ॥
दारितरिपुवक्षोजं सच्चक्रपाणिर्नरहरिं नत्वा ।
विद्वन्मण्डलहृद्यं तत्परमतखण्डनं तनुते ॥ २ ॥

हयवरट् ।

हयोपदेशोऽडिणोः शल्वलोश्च हकारग्रहणार्थः । यत्तु हयवरट्सूत्रे हकारोपदेशप्रयोजनमडादौ तद्ग्रहणमित्युक्त्वा हलसूत्रमुपादाय एतत्सूत्रप्रयोजनं अनादौ ग्रहणम् । तेनाधुच्चदित्यादि सिध्यतीत्युक्तम् । तच्च प्रथमं हकारोपदेशप्रयोजनमुक्तत्व सूत्रप्रयोजनमिति भेदेन ग्रहणे किं बीजम् । न तावदाद्ये हका-

रानुपादानेऽपि यादिग्रहणाय ह्रूचमावश्यकमिति ह्रकारोक्तिः। अन्त्ये तु ह्रकारानुपादाने वलादयः प्रत्याह्रारा रेफेणैव ग्राह्या इति लकारोऽपि नोपादेय इति सूचोपादानमिति । तथा सति रेफात् पूर्वं ह्रोपदेशे रेफेण च वलादिग्रहणे कदिह्रीत्यादिसिद्धौ लकारोपादानप्रयोजनानुक्तेर्न्यूनतेति चिन्त्यम्। किन्तर्हि चरमलकारोपादाने प्रयोजनमिति चेत्। हरिर्हरिरित्यत्र खरवसानयोरिति विसर्जनीयस्य तस्य वा शरीति विसर्गविकल्पादेश्चाप्रवृत्तिः । एवं वाग्हरिरित्यादावपि चर्वाप्रवृत्तिः। रेफात् पूर्वं होपादाने तस्य खर्शरोर्ग्रहणादिति ॥

हलन्त्यम् ।

अत्र हल्प्रत्याह्रारसिद्धावनेन लस्येत्सञ्ज्ञा तत्सिद्धौ च हल्प्रत्याह्रारसिद्धिरित्यन्योन्याश्रय इति ह्रलित्यावर्तत इत्याकरः। अत्र केचित्। स्यादेतत् ह्रलित्येकदेशस्य तन्त्वादित्येकशेषान्यतममस्तु ह्रस्य ल इति च व्याख्यास्यते। सामोप्यं षष्ठ्यर्थः। यद्वा। मास्तन्त्वादि अस्तु समाह्रारद्वन्द्वः। ह्रल् च ल् चेति। लकारस्य संयोगान्तलोप इति चेन्नैवम्। आद्ये समासस्लिष्टत्वात्। न हि ब्राह्मणकम्बल इत्यादौ ब्राह्मणस

सीप्यवर्त्यन्यद्दीयः कम्बलः प्रतीयते। न वा चिच्छगुश-
ब्दाच्चिचगवीनां समीपवर्ती दत्तादिः प्रतीयते। अत
एवानन्तरादिषु न समासोऽनभिधानादिति सृष्टमा-
करे। किम्बहुना ब्राह्मणस्य कम्बलश्चित्रा गौर्यस्येति
व्यस्तप्रयोगोऽपि तत्रानिष्टः। द्वितीयेऽपि संयोगान्त-
लोपो दुर्लभः। यणः प्रतिषेधारम्भात्। तत्प्रत्याख्या-
नपक्षेऽपि झलो झलीति झलग्रहणमपकृष्य झलः
संयोगान्तलोपविधानाच्च। किञ्च पदार्थबोधं विना
वाक्यार्थबोधासम्भवेन हलप्रत्याहारसिद्धेः प्रागेतत्सू-
त्रार्थबोधे प्रसक्ते तदुद्धारार्थोऽयं यत्नः। अस्यां चावस्थायां
हलन्त्यग्रहणसिद्धौ द्वन्द्व एव दुर्लभः। सहविवक्षाया
ऽसम्भवात्। तस्मात्सूत्राद्वृत्तिरेव न्याय्येत्याहुः। तत्र सा-
मीप्यस्य षष्ठ्यर्थत्वे षष्ठीति च समासविधायके सति कः
क्लोप्तृ इति तावच्चिन्तनीयम्। न च सामीप्यस्य षष्ठ्याऽबो-
धात्तत्र षष्ठ्यभावः क्लेशः। गङ्गायास्तीरमित्यादौ षष्ठ्या
सामीप्यप्रतीतेः। समर्थसूत्रे च देवदत्तस्य गुरुपुत्र इत्यत्र
सापेक्षत्वात्समासाभावमाशङ्क्य प्रधानस्य पुत्रस्य देवद-
त्तसम्बन्धसापेक्षत्वं न तु गुरोरित्युत्तरिते बाधकत्वेनोप-
न्यस्तस्य तथा सति गुरुपुत्रो देवदत्तस्य किञ्चिदिति
बुध्येतेति भाष्यस्य कैयटेन सामीप्यादेरपि प्रतिपत्तिप्र-
सङ्ग इति व्याख्यानात्। षष्ठी क्ष्याक्रोशगतिसूत्रे ऽस्तेर्भूरस्तेः

स्यानेऽनन्तरे समीपे इति सामीप्यस्यापि षष्ठ्यर्थत्व भाष्योदाहरणाच्च । एतेन व्यस्तप्रयोगस्यानिष्टत्वं प्र क्तम् । कथं तर्हि ब्राह्मणस्य कम्बल इत्यादौ न ब्राह्म समीपवर्त्यन्यदीयकम्बलप्रतीतिः । तच्च तात्पर्यज्ञानाध वात् । सति च तस्मिन्निष्टापत्तिः । न च सामीप्यषष्ठ समासाभावोऽनन्तरादिषु समासाभावस्याकरसिद्धत्व हिति क्तम इति वाच्यम् । अनन्तरादिषु बहुव्रीहेरेवा भिधानेनाभावात् । एतच्चतस्य लोप इति सूत्रे कैय मतुप्सूत्रे च भाष्ये स्पष्टम् । अत एव गङ्गातीरमि षष्ठीसमासप्रयोगः सर्वजनसिद्धः । यच्च संयोगान्तलो दुर्लभ इति । तन्न यणः प्रतिषेधात्मात् । न वा भर लोपात्। बहिरङ्गलक्षणत्वादिति लाघवोपष्टब्धस्य बलि रङ्गपक्षस्य च परमुपन्यासेन प्राबल्यानुमानात् । प्रक्र च बहिरङ्गत्वाभावात् संयोगान्तलोपे बाधकाभावात् अत एवाच सूत्रे लकारश्चेति वक्तव्यमिति न विभक्तौ सू स्यं च लुप्तनिर्दिष्टो यकार इति भाष्यं कैयटेन संयो गान्तलोपपरत्वेन व्याख्यातम् । अत एव उरण्सूत्रे च णप्रहणप्रयोजनकथनावसरे आनङोऽपि रपरत्वं स्य दित्यर्थकं होतापोतारावितिभाष्यमुपादाय रेफस्य व योगान्तलोपे कृते तस्यासिद्धत्वान्नलोपो न स्यादिति कैयटः सङ्गच्छते । अत एव कर्मवत्सूत्रे व्यत्ययो बहुल

लिङ्याशिष्यङिति अकरेखपञ्च द्वितीयलकारं प्रक्षिप्य तस्य संयोगान्तलोप इत्युक्तं सङ्गच्छते । यद्पि द्वन्द्वो दुर्लभः सहविवक्षाया असम्भवादिति। तदेदमालोचनीयम् । पाणिनिना स्वसङ्केतितानामर्थादिशब्दानां सङ्केतलघुनोपायेन बोद्धारः प्रतिपद्यन्तामित्यादिरन्त्येनेति सूत्रं प्रणीतम्। तत्रानेन सूत्रेण लक्ष्येसंज्ञायां ह्रस्वपदसङ्केतग्रहस्तस्मिंश्च सति अनेनेत्संज्ञाग्रह इति बोद्धून् प्रति अन्योन्याश्रयो न वक्तारं प्रति विवक्षा च वक्तुः सा चास्मात्पदादसुमर्थमयं जानात्विती च्छा तथा चादिरन्त्येनेति सूत्रव्यापारात् प्रागपि ह्रस्वपदसङ्केत-विषयानर्थान् पाणिनिर्जानात्येवेति कथं सह विवक्षाया असम्भवः । न चैवमपि द्वन्द्वघटकह्रस्वपदार्थज्ञानाभावाद् द्वन्द्वार्थज्ञानाभावे द्वन्द्वार्थशाब्दबोधोऽपि कथं बोद्धृणामिति वाच्यम् । तथापि सहविवक्षासम्भवस्यानुपपादनात् । द्वन्द्वघटकह्रस्वपदार्थज्ञानात् पूर्वं लकारेत्संज्ञाने ह्रस्वपदार्थप्रसिद्धौ क्रमेण द्वन्द्वार्थबोधसंभवाच्च । न हि समासघटकैकपदार्थज्ञाने तद्घटकपदार्थान्तरस्यापि न शाब्दबोध इति नियमः । सुखनयनं पश्येत्युक्तौ सुखपदार्थमजानतोऽपि नयनं पश्यति प्रतितेरा-भविकत्वात् । न च सह विवक्षायां द्वन्द्वविज्ञानात् सहितबोधस्यैव वक्तृतात्पर्यविषयत्वेन कथं

केवललकारबोधः पूर्वमिति वाच्यम् । शाब्द-सामान्ये तात्पर्यज्ञानस्याकारणत्वेन तद्विषयेऽपि केवललकारबोधे बाधकाभावात् । कारणत्वेऽप्येकदेश-तात्पर्यज्ञानात् प्रथमबोधेन हलपदार्थप्रसिद्धौ चरमंता-त्पर्यविषयबोधसम्भवात् । न हि यादृशं वक्तुस्तात्पर्यं तादृशतात्पर्यबोधमादायैव दोषपरिहार इति नियमः । अत एव हलप्रत्याहारसिद्धेः प्राक् संयोगसञ्ज्ञाया असि-द्धौ कथं संयोगान्तलोप इत्याशङ्क्यायां हलोऽनन्तरा इति सूत्रे हलप्रत्याहारसिद्धेः प्रागनन्तरा हकारलकाराः संयोग इति वाक्यार्थबोधानन्तरं लकारपदस्य संयोगस-ञ्ज्ञायां तदन्तलोपेन लकारस्येत्सञ्ज्ञायां हलप्रत्याहा-रसिद्धौ वास्तवार्थबोध इति कैश्चित् समाहितम् । आप-ञ्चेयमतिस्थूलदृशः । न हि संयोगान्तलोपलक्षणानु-सन्धानाभावे लुप्तलकारार्थं तदनुकार्यलकारानुसन्धानं न सम्भवति । लौकिकव्युत्पत्त्यैव तत्संभवात् । अन्यथा क्विब्लोपलक्षणमजानतोऽग्निचिदित्यतः क्विबर्थबोधो न स्यात् । कथमन्यथा सुब्प्रत्याहारसापेक्षलक्षणवि-हितो हन्द्वो हलपदाद्वित्तिपक्षे षष्ठीतत्पुरुषश्च तव मते सङ्गच्छेत । प्रकृते लकारबोधपूर्वकहन्द्वार्थबोधतात्पर्यक-ल्पने बाधकाभावाच्चेत्यलम् । एवञ्चान्योन्याश्रयपरिहा-राय हलन्त्यमिति सूत्रमावर्त्य वाक्यद्वयं प्रकल्प्य हलसूत्रे-

ञ्न्यमित्यर्थकैनैकेन वाक्येन लकारेत्सञ्ज्ञायां ष्ठल्स-ञ्ज्ञासिद्धौ द्वितीयं वाक्यं णकारादीनामित्सञ्ज्ञार्थमिति तेषामुत्तिगौरवपराहतेति प्रक्रियाकौमुदीप्रकाश एव स्फुटमिति ॥

उपदेशे ।

उपदेश इति करणे बाहुलकात्ल्युडभावे घञिति भाष्यकारादयः । अचाद्योच्चारणमुपदेशः । भावे घञ् । भाष्यादिषु करणे घञिति तु प्रौढिवाद इति केचित् । तन्न । भाष्यकारैः करणघञन्तस्योपदेशशब्दस्य लोकेऽपि साधुत्वस्वीकारात् । तदनुरोधेन करणे घञोऽवश्यस्वीकर्तव्यत्वात् । न च सौत्र्यैवोपदेशशब्दस्य साधुत्वं भाष्यसम्मतं न तु लौकिकस्यापीति वाच्यम् । तथा सति सौत्रत्वेन परिहारसम्भवे ल्यत्ल्युटो बहुलमिति बाहुलकस्वीकारानुपपत्तेः । सर्वार्थत्वे बाहुलकस्य सम्भवति सौत्रमात्रविषयकत्वेन सङ्कोचे मानाभावाच्च । अत एव एओङ्सूत्रे सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणमिति वार्त्तिके उपदेशशब्द उपदेशप्रयोजने करणव्युत्पत्त्या प्रयुक्तः । कौस्तुभे स्वयं व्याख्यातश्चेति । यत्तु प्रक्रियन्ते शब्दा याभिरिति करणव्युत्पत्तिः परास्ता । परत्वेन ल्युटा

रणप्रयोजनं दुर्लभं धात्वादीनामनुबन्धरहितान
धात्वादित्वात् । उपदेशकाल एवानुबन्धानामि
लोपात् । अत एव न धातुलोपसूत्रस्थभाष्यद्व
टयोरविरोध इति वाच्यम् । अत्र धात्वादिपदेन
बन्धसहितानां धातुपाठपठितानां ग्रहणात् । ते
वोपदेशत्वात् । तैरेव हि प्रयोगस्था धात्वादय उ
श्यन्ते । अत एव हलन्त्यसूत्रे धात्वादीनामन्त्यं ह
दित्यर्थकभाष्यस्थधातुपदमप्येवम्परत्वेन व्याख्येयमि
न काऽप्यनुपपत्तिः । यत्तु व्याख्यातृग्रन्थदूषणं धात्वा
ष्वित्यादि सोऽयमनुन्मोपालम्भः । तत्र हि न पूर्व
हृतधात्वादिष्वेव करणव्युत्पत्तिकथनं किन्त्वागमा
पि । अत एव करणसाधनव्युत्पत्त्याऽज्ञातस्वरूपज्ञाप
रणां शास्त्रवाक्यानामुपदेशत्वमिति । शास्त्रवाक्य
शास्त्रसम्बन्धिवचनानामिति कुगादिवचनसाधारण
त्वम् । सर्वानुदाहृत्य एते च कर्मव्युत्पत्त्योपदेशा इ
कथने एतच्छब्देन सर्वेषां धात्वादीनामुपादानम् । च
रः कर्मव्युत्पत्त्येत्यत्र सम्बन्धेन करणव्युत्पत्तेः समुच्चा
इति सर्वत्र व्युत्पत्तिद्वयस्य तदभिप्रेतत्वात् । उपदे
तात्प्रयोजकेत्यस्योपदेशतात्पर्यग्राह्यधिकरणतावच्छेदके
त्यर्थः । अत एवोपदेशत्वं यावति पर्याप्तं तत्रेत्युपदेश इ
त्यस्योपदेशतेत्यादिसमुदितवाक्यार्थे उक्त इ

स्वग्रन्थविरोधोऽप्यपास्त इति दिक् । यत्तु प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दस्य लक्षणेति क्लिष्टं व्याख्यानमिति तन्न । भावकर्तृकारकविहितख्याङो लाघवाङ्गावे शक्तिरन्यच्च लक्षणेति तद्व्याख्यानभावात् क्लेशाभावात् । न हि तस्मिन्नर्थे विधानमात्रेण तच्च शक्तिः कृद्योगषष्ठ्याः कर्तृकर्मणोर्विधानेऽपि प्रचुरप्रयोगेण सम्बन्धमात्रशक्तायाः कर्तृकर्मणोर्लक्षणास्वीकारादिति । यच्च । यत्तु जमन्ताड्ड इति । जमि जमन्तेष्वनिडेक इष्यत इति च जम् वार्त्तिकशता व्यवहृत इत्याहुस्तद्भसाभिधानम् । आद्यस्योणादिसूत्रत्वात् । द्वितीयस्य व्याघ्रभूतिकारिकास्थत्वादित्याहुः । तन्न । जम् वार्त्तिकशता व्यवहृत इति तैरनभिधानात् । चय् जम् वार्त्तिकदृष्ट्या न तु सूत्रकृत्संमत इति हि तेषामभिधानम् । तच्च वार्त्तिकद्वयाघ्रभूत्युणादिकृतीरप्युपलक्षणम् । सूत्रं चाष्टाध्यायीस्थं तत्करणञ्च विशेषणम् । तेनोणादेः सूत्रत्वेऽपि अष्टाध्यायीकर्तृकणादिकर्तृत्वेऽपि न क्षतिः । तथा चाष्टाध्यायीव्यवहृतानामेकचत्वारंशत्वाभिधानमिति स्फुटमिति दिक् ॥

तुल्यास्य ।

स्थाननिरूपणे अमङ्गनानां नासिका चेति केचित् ।

तन्न । तेषां नासिकास्थानत्वे मानाभावात् । अनु
रयमानां नासिकास्थानमुच्यत इति पाणिनिशि
यमानुस्वारयोरेव ग्रहणात् । नासिकाव्यापारस
तत्स्थानत्वेऽनुनासिकाकारादीनामपि नासिकास्थ
प्रसज्येतेति तदकथने न्यूनता । किञ्चैवं सति तु
स्यमित्यत्र किञ्चित्स्थानसाम्ये आश्रीयमाणे ऊमन
नानां स्पृष्टप्रयत्नानां परस्परं सावर्ण्यं स्यात् । तथ
त्वन्नयसीत्यादावनुस्वारस्य परसवर्णो वा प्रदान्
त्यनुस्वारान्तरतमा ङकारादयोऽपि स्युः । सर्वस्थान
व्याश्रयणे कङादीनामपि सावर्ण्यं न स्यादिति त्व
रोषित्यादौ ङकारादयप्रसङ्ग इति । न च सवर्ण
ज्ञायां तुल्यास्यप्रयत्नत्वमन्यूनास्यप्रयत्नत्वम् । तथा
यद्यस्यान्यूनास्यप्रयत्नं तत्तस्य सवर्णमिति सवर्ण
ज्ञासूत्रार्थः । एवञ्च ङकारादीनां नकारन्यूनस्थानत
त्वन्नयसीत्यादौ नातिप्रसङ्गः । ककारादन्यूनस्थानत्व
त्वङ्करोषीत्यादौ नाप्रसङ्गः । परस्परान्यूनस्थानप्रय
त्वस्य सवर्णसंज्ञायामनपेक्षणात् ककारादीनां ङका
दान्यूनस्थानत्वाभावेऽपि क्षतिविरहादिति वाच्यम् । व
सति वकारस्य लकारसावर्ण्यं स्यादिति तौल्वलि
लकारस्याणत्वेन वकारग्रहणप्रसक्तौ तद्वस्त्वित्यादौ त
र्गस्य वकारसवर्णापत्तेः । रलो व्युपधादित्यत्र रलो निर्

ट्लकारेण वग्रहणाद्दिदेविषतीत्यत्रापि सनः किच्चा-
पत्तेः । तंश्लोकमित्यादावनुस्वारस्य ययीत्यनुस्वारस्य
सवर्णानुनासिकवकारापत्तेश्च । न च शिक्षायां
दन्तोष्ठस्य द्वन्द्वेन निर्देशात् समुदितस्य वकारस्थानत्वं
न तु प्रत्येकमिति दन्तस्थानत्वाभावाद्दस्य न लसावर्ण्यं
ङकारस्य तु पृथक्कण्ठनासिकास्थानत्वं निर्दिष्टमिति
कण्ठस्थानाङ्गवति वसावर्ण्यम् । अत एव धात्वादे-
रिति सूत्रेऽज्दन्त्यपरा इत्यत्र खिदादयः पृथङ्निर्दिष्टाः ।
न्यथा दन्त्यपरत्वादिना तेषामपि संग्रहेण तेन पृथङ्नि-
र्देश्येरन्निति वाच्यम् । तथा सत्यदुह्वहीत्यत्र लुग्वा दुहेति
सनुको बुवूर्षत इत्यत्र उदोष्ठ्यपूर्वस्येत्युकारस्य चाना-
त्तेः । अज्दन्त्यपरा इत्यत्र च दन्त्यग्रहणेन वकारो
ग्रहीतेत्याशङ्क्य व्यादिति खिदादयो भेदेन निर्दि-
ष्टा इति कैयटेनाशङ्क्यामाचविषयत्वेन पृथङ्निर्देशस्या-
धानादिति । अन्यैरपि पृथक् खिदादिग्रहणादिह
त्यशब्दः केवलदन्त्यपरस्तेन खिदादिनां नेत्यभिद-
ञ्चिरन्यत्र दन्त्यग्रहणे वकारग्रहणं सूचितम् । किञ्च ।
ङं रघेनेत्यत्रानुस्वारस्य परसवर्णाभावायानुस्वारस्य
नीत्यत्र जातिपक्षमाश्रित्य स्थानेऽन्तरतमपरिभाषयैक-
क्यतया ऽनुस्वारान्तरतमः परसवर्णो भवतीति वा-
र्थं आश्रितः । तथा च आदीनां नासिकास्थानत्वे

तेषामेवानुस्वारान्तरतमत्वेन त्वङ्करोषीत्यादावनुस्वारस्य ङादिसिद्धावपि संवत्सर इत्यादौ वकारो न सिध्येदिति ॥

पूर्वत्रासिद्धम् ।

अत्र सपादसप्ताध्याय्यां विहितं कार्यं प्रति त्रिपाद्यां विहितमसिद्धमिति प्रक्रियोक्तौ मनोरथ इत्यादि सिध्येदिति केचित् । तन्न । प्रक्रियोक्तेर्हि कार्यं प्रा कार्ये कर्तव्ये ऽसिद्धं पूर्वमेव न जातमित्यर्थः । शास्त्र सिद्धत्वेऽप्ययमेव फलितोऽर्थः । तदुक्तं कैय्यटेन । यच्छास्त्र मुच्चारितं तस्यासिद्धत्वमशक्यं कर्तुमित्यसिद्धवचनार्थ देश आश्रीयत इति । तथा चातिदेशेन कार्यप्रवर्त त्वरूपोऽसिद्धधर्मः शास्त्रे ऽतिदिश्यमानः कार्यासिद्ध एव फलति। एवं च मनोरथ इत्यत्रोत्वे कर्तव्ये रलोप पूर्वमेवाप्रवृत्तौ रोकत्वस्याप्रतीघातान्मनोरथसिद्धिरप्रत्य ति। ऋटलवर्णयोरित्यत्र आ च आ च रलौ तौ च तौ व चेति कैश्चिद्विगृहीतम् । तच्च ऋटलोरन्तरङ्गत्वेन प्रथम दीर्घत्वे रावितिस्यात् । ऋत्यक इति प्रकृतिभावे ऋट लाविति स्यादिति रलाविल्यनुक्तिसम्भवमिति । न वार्णादाङ्गं बलीय इति पूर्वमृतो ङीति गुणस्ततो य रलाविति सेत्स्यतीति वाच्यम् । आङ्वार्णयोर्युगप

प्रवृत्तौ खाङ्गं बलवद्यथा कारक इति । प्रकृते च विभ-
क्युत्पत्तेः पूर्वं गुणाप्रवृत्तावन्तरङ्गत्वात् सवर्णदीर्घप्र-
वृत्तौ बाधकाभावात् । न चान्तरङ्गपरिभाषाबाधिकया
ऽऽद्गुतव्यूहपरिभाषया गुणप्रवृत्तौ दीर्घाप्रवृत्तिरिति
वाच्यम् । यत्र बहिरङ्गेणान्तरङ्गस्य निमित्तविघातो
न त्वन्तरङ्गेण बहिरङ्गस्य तत्राद्गुतव्यूहपरिभाषाप्रवर्त-
नात् । पेचुष इति यथा । प्रकृते चान्तरङ्गेण दीर्घेण
बहिरङ्गस्य गुणस्य ह्रस्वऋकाररूपनिमित्तविघातेनाद्गु-
तव्यूहपरिभाषाया अप्रवर्तनात् । किञ्चेदृशस्थले ऽन्तरङ्गेण
बहिरङ्गनिमित्ताविघाते ऽपि अद्गुतव्यूहपरिभाषा न प्रव-
र्तत इत्यवश्यमभ्युपेतव्यम् । अन्यथा जनसनेति विट्
विड्नोरिति नकारस्याकारे ऽन्तरङ्गत्वात् सवर्णदीर्घे
आतो धातोरित्याकारलोप इति प्रक्रियया पशुष इत्या-
दि न सिध्येत् । अतो लोपे भाविनि सवर्णदीर्घस्यान्त-
रङ्गस्याप्रवृत्तेः । अभ्युपगतञ्च पशुष इति रूपमसिद्धव-
त्वे भाष्ये इति चिन्त्यम् । अथ ऋल अस्यामेवावस्थाया-
मृत्यक इति प्रवृत्तावपि ऋतो ङीति गुणे ऋत्परत्वाभा-
वात् प्रकृतिभावाभावे यणा यथोक्तसिद्धिः । न चैकोसवर्ण
इति प्रकृतिभावः । समासे तन्निषेधात् । वैकल्पिक-
त्वेन पक्षे तस्याप्रवृत्तेश्चेति चेन्न । अचः परस्मिन्निति
गुणस्य स्थानिवद्भावेन ऋत्परत्वात् प्रकृतिभावतादव-

वस्यथात् । न च पदान्तविधिः कार्यान्तराभावपर्यवस
यिनः प्रकृतिभावस्य पदानवयवत्वात् । यदपि उच्च
ल् च रलोरिति विगृह्णीतम् । तदपि चिन्त्यम् । ओर
ऋतोऽङीति गुणानिमित्तत्वादिति दिक् ॥

इति सञ्ज्ञाप्रकरणम् ।

इको गुणवृद्धी ।

इह भाष्याद्यनुक्तोऽपि नियमपक्षः सुसाधस्तच्छे
पक्षाद्विशिष्टश्चेति निरूपितं प्रक्रियाप्रदीपे ऽस्माभिः
तथाहि एतत्परिभाषाया अलोन्त्यशेषत्वे मिदेर्गुण
पुगन्तलघूपधस्य च सृजेर्वृद्धिरित्यादौ दोषमुद्भाव्य मि
दुर्मिदिः पुक्यन्तः पुगन्तः लघ्वी उपधा लघूपधा तद
समाहारद्वन्द्वः । सृजेर्वृद्धिरित्यचोऽञ्णितीत्य
ङित्यपकृष्यत इति प्रकृतिपरिभाषानुपस्थाने ऽपि स्यान्नुप
दानादेवेष्टस्यानिलाभो भाष्यकृतैवोक्तो नियमपक्षे ऽप्य
न्वेयः । किन्त्वेवं सति ङ्किति चेत्यत्र लैगवायनादावति
प्रसङ्गाभावाय चस्येत्यर्थकत्वेन इक इति विहितयोर्गु
णह्यो र्निषेध इत्यर्थाल्लघूपधगुणस्येक इत्यविहित
त्वाङ्ङिन इत्यादौ निषेधायोगात्तच्छेषपक्षे गुणो दुर्वा
नियमपक्षे तु रुणद्धीत्यादावनिकोऽपि लघ्व्या उपधाया
सत्त्वात् तत्प्रवृत्तावपि इक इति नियमितो लघूपधगुण इति

न्निषेधः सुलभ इति । एतेन नियमपक्षमनूद्य तच्छेष-
क्षं दूषयित्वा पदोपस्थितिपक्षस्यैव भाष्ये समर्थित-
त् तच्छेषपक्षेऽपि दूषणोद्धारस्तु शब्दकौस्तुभे स्प-
ोकृतोऽस्माभिरिति परेषां रिक्तं वच इत्यवगन्तव्यम् ॥

मिदचोऽन्त्यात्परः—।

अत्र सूत्रेऽन्त्यादचः परो मिदिति प्राचोक्तवृत्तौ
च इति निर्द्धारणे षष्ठी न तु पञ्चमी जातौ चैकव-
नम् । तथा चाचां मध्येऽन्तादित्यर्थः । तेनाच इति
तावन्त्यादिति समानाधिकरणा पञ्चमीत्यभिमानेन
मुचादीनामित्यादावाप्त्यभिधानं प्रत्युक्तम् ।
त्वभक्तत्वे ऋपूणीत्यत्र दर्धौ न स्यादित्यनूद्य तत्तदा-
ग्रहणं स्यादिनुमर्थमिति वार्त्तिकेनैव दूषितप्राय-
ति व्याख्यातृवचनमाणम् । तन्न परादित्वे वह्लिह
यादावनुस्वारादि स्यादत एवाभक्तत्वपक्षोऽप्युपे-
: । ऋपूणीत्यादावन्तत्वादङ्गस्य दीर्घप्रसङ्गश्चेति
ख्यातृग्रन्थस्तु च परादित्वदूषणेनाप्युपपत्तेरुक्त-
षनिरासादि । यत्वादेः परस्येति सूत्रं विवृण्वता
वापञ्चमीनिर्देशेनेत्याद्युक्तं तदसम्बद्धमिति केचित् ।
परत्वानुदेन यस्य यत् कार्यं तत्तस्यादेरित्येव
र्थः परत्वानुवादश्चोत्परस्यात इत्येतद्विषयो न ।

तत्रास्त इति स्थानिनिर्देशात् । किन्तु तस्मादित्युत्तरस्येति परिभाषोपस्थितोत्तरत्वविषय इति स्पष्टं शिष्यस्य पञ्चमीनिर्देशेनेत्यादि प्राचो वचनं कथम् स्वङ्गेति तच्चिन्त्यम् ॥

इति परिभाषाप्रकरणम् ।

इङ्गो यणादि ।

अत्र इङ्गयणोर्यणादेशत्वाभावोपपादनाय षष्ठिरिङो यण: सप्तम्यर्थानन्वयेन स्थानग्राहकत्वे गुणानामनेकत्वेनानुनासिकानामपि यङ्लानां ग्रहणादिति । तत्र गुणानामनेकत्वपक्षे कथं सप्तम्यनुनासिकयङ्लग्रहणं हेतुरिति चिन्त्यम् । इयर्थं चाङ्गयत्वोपपादनं यथाश्रुतयणुपपन्यासप्रयोजनाधीनं दीर्घाद्युपस्थानोपायश्च प्रक्रियाप्रदीपादवेय इति ॥

अनचि च ।

अत्र वा द्वे इत्यनुवृत्तमेव द्वित्वे त्रिमभृतिष्वति त्रिग्रहणमयर्थमिति केचित् । तन्न दीर्घादाचार्याणामित्यस्य नित्यत्वात् कथं वैयर्थ्यम् । न चाचार्यग्रहणेनास्यवैकल्पिकत्वम् । तस्य पूजार्थत्वात् । अत एव नादिनीत्यत्र नचिचेति शरोचीत्यत्राचो रहाभ्यामिति प्राप्तिः काकायामुक्ता । त्रिमभृतिष्वति स्वच्छन्दे द्वित्वप्रार्थ

मनुङ्ङाख्य दीर्घादाचार्याणामित्यत्र अनचि चेति मार्पित हरदत्तेनोद्भाविता । तस्य ह्ययमाशय उन्नीयते । त्रिप्रभृतिष्विति प्लुतद्वयं वैकल्पिकनिषेधविधायकम् । तच्च प्राप्तप्लुतद्वावनं नावश्यकम् । विकल्पस्याप्राप्तत्वेऽपि यस्यापि स्वभावात् । नित्यनिषेधे तु लघुद्वावनमावश्यकमिति । यच्च त्रिप्रभृतिष्विति प्लुतमावश्यकम् । अन्यथा राष्ट्रमित्यादौ दीर्घात्तु परस्य द्वित्वं न स्यात् । न चास्त इत्यत्र माधवेन द्वित्वकरणात् कथमिदमिति वाच्यम् । तत्र माधवग्रन्थस्थान एव प्रकाशे दूषितत्वात् । आत्वा रथमित्यत्र प्रातिशाख्यभाष्ये द्वित्वमर्जनं च छान्दसत्वेन निर्वाह्यम् । वाक्कू वाक् इत्यत्र भाष्योदाहृतद्वित्वनिर्वाहश्च दीर्घादाचार्याणामित्यनचीत्यस्य हलीत्यर्धकस्यानुवृत्तेरित्यादि प्रक्रियाकौमुदीप्रकाशादवसेयम् । एतेन दीर्घादाचार्याणामित्यत्र पूर्वं आचार्यग्रहणं पूजार्थमित्यभिप्रेत्य वाक् वाक्कू इति भाष्योदाहृतविकल्पे उपपत्तिचिन्तार्थं क्लेशो मुधैव । पूजार्थतायाः प्रामाणिकैरनुक्तेरित्यादि परास्तम् । यत्तु हयानि वत्सूत्रे धात्वङ्गेत्याद्युदाहरणाद्ययस्वाङ्गपक्षाभ्यां पृथगुपन्यासवैयर्थ्यदूषणोपन्यसनं तत् कौस्तुभे स्वयमेव गोबलीवर्दन्यायेन समाहितत्वादनादेयम् ॥

संयोगान्त—।

यत्तु यत्त्वाहुर्वार्त्तिककृतो वचनं प्रत्याख्यान
रङ्गयन्तु भाष्यकृत इति तन्निर्मूलम् । मतभेदे प्रम
णाभावादिति । तन्न । भाष्ये तु संयोगान्तलोपे धुरो
ना इतीति समर्थितमिति कालन्तपरिशिष्टो
मानत्वम् । धुडिति हि सत्यच्यते । यदपि
कलत्रं शाल्मं चाचक्षाणः काव् कलत् शाल् । प्र
त्ययूव्य तच्च संयोगान्तलोपो दुर्लभः । प्राच्यप
क्रूप्यार्थं पूर्वपूर्वपदान्तङ्गं परं बहिरङ्गमित्यल्ल
लोपयोरसिद्धत्वात् । वन्तयोः क्विपि क्वौ
प्रत्ययस्यानित्वाद्धठो दुर्वारत्वात् क्विचि लोपी व्य
त्ययस्य प्रसङ्गाच्च । गिरिशेश्मयतेस्तु क्विपि
प्रतिषेधार्थं वचनारम्भपक्षे गिरिवेडित्युचितम् । प्र
त्ययानपक्षे तु शान्तमेवेति । तदप्यसत् । स्कन्द
स्कन्दित्यादि न पदान्तसूत्रस्थकैटेन कुस्मयतेः क्वि
बहिरङ्गापवादाभिप्रायेण माधवेन न स्वग्रन्थेन विरो
धात् पूर्वपूर्वमित्या द्युक्तेर्व्यवहितत्वात् क्विचिकाठ्यशब्द
क्विचि संयोगान्तलोपस्यासिद्धत्वाद्यलोपेऽलोपादेः
निवत्वाभावे ऽपि शाल्वशब्दे तदभावाल्लोपो
रित्यस्यासम्भवाच्च । अत एव काठ्यशाल्वशब्दयो
श्रुत्यात् तदत्र क्लिन्तत्वमिति चिन्त्यमिति प्रकाश

द्वैरुक्तम् । वस्तुतो हलन्त्यमिति सूत्रोक्तभाष्यादिब-
ात् स्वयं गिरिवेडित्यत्र फलभेदस्वीकारेण च नेह
क्षाणामैकरूप्यमित्युक्तक्लेशाश्रयणन्निर्मूलमेवेत्यांस्तां
ावत् । सुध्युपास्य इत्यत्र पुनर्द्वित्वेलोपविकल्पेऽन्य-
रद्वित्वेऽनुभयद्वित्वे च नव इति प्रक्रियाकौमुद्यां प्र-
काशकृद्भिर्धस्य जश्त्वे दस्य द्वित्वंधस्यैववेत्युक्ताऽन्ते
यकारयकारोभयद्वित्वे उभयोः पुनर्द्वित्वे लोपविकल्पेऽ-
न्यतरद्वित्वे ऽनुभयद्वित्वे च नव रूपाणि । तथा हि ।
एकधं त्रिधा । एकयं द्वियं त्रियं च । एवं द्विधं त्रिधं
वेति । न चान्तरङ्गे द्वित्वे बहिरङ्गस्य यणोऽसिद्धत्वम् ।
वैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषा न प्रवर्त्तत इति वि-
र्जनीयसूत्रे भाष्यकैयटयोर्व्यवस्थापितत्वादित्युक्तम् ।
अत्र केचित् । एकस्यां व्यक्तावेकं लक्षणं सकृदेव प्रव-
र्तत इति एकः पूर्वपरयोरिति सूत्रे भाष्ये सिद्धान्तित-
त्वात् कथं पुनरर्द्वित्वप्रवृत्तिरन्यथा द्वित्वानन्त्यापत्तेः ।
न च झरो झरीति हलन्त्यमिति च लोपेन निर्वाह-
स्तस्य वैकल्पिकत्वात् । किञ्चैवं सति सर्वस्य द्वे इति
द्वित्वमपि पुनः पुनः प्रवर्त्तत । अत एव लिटि धातो-
रिति सूत्रेऽनभ्यासग्रहणं भाष्ये प्रत्याख्यातम् । सन्नन्ता-
द्यङन्ताद्वा णिचि चङ द्वित्वाभावार्थं तदिति कैय्य-
टादिभिरुक्तम् । प्रकाशोक्तप्रथमपक्षे तावन्न दोषः

पूर्वत्रासिद्धमद्वित्व इति जश्त्वासिद्धत्वाभावात् क
ष्टकारस्य द्वित्वमिति व्यक्तिभेदात् पुनर्द्वित्वमप्यू
ह्य संयन्तेत्यादौ परसवर्णे यकारद्वित्वे भाष्यसू
त्रमित्यत्र टकारद्वित्वं रामाद्वित्यत्र जश्त्वेऽपि म
त्वं द्वित्वे च रूपचतुष्टयं भवतीदाहरणम् । त
च पूर्वत्रासिद्धीयमद्वित्वं इत्यपव्ययम् । अस्मि
न्युपेत्य प्रवृत्तद्वित्वपक्षे ऽस्यार्धधातुकद्वित्वं चिन्त्य
द्वित्वनत्वे स्यान्यादेशश्चयस्तयोश्च भेदाङ्गकार
स्य पुनः प्रवृत्तौ क्षत्यभावात् । यदुः पूर्वपर
सूत्रे भाष्ये सकृत्प्रवृत्त्य विधानं चानवधानजन्य
तन्त्राधानद्विधास्वदृष्टान्तेन क्वचिद्वैकस्मिन्न
नुष्ठापकत्वं स्यान्न प्रयोगान्तर इत्याशङ्क्य व
क्ष्यमाणद्विधास्वदृष्टान्तेन प्रयोगान्तरेऽपि गुणा
देरेव सिद्धान्तितत्वान्न तु सकृच्छास्त्रप्रवृत्तेः ।
त्यापत्तिरपि स्फुटे न दोषः । स ह्यनङ्गकार्यं
प्रयोगस्याप्रवृत्तौ शास्त्रकार्यावयस्य परिनिष्ठित
स्वाभावात्तच्छास्त्रस्यानेकानुष्ठापकत्वापत्त्या दोषः ।
च सा नास्ति द्वित्वस्य वैकल्पिकत्वेन यापच्छ
त्वसहितप्रयोगस्य परिनिष्ठितत्वेन तेनैव शा
कृतार्थत्वात् । णिटि ध्यातीति द्वित्वस्य तु
त्वादानन्त्यापत्तेः क्वचिद्द्विश्नौ कल्पनीयायां
वात् प्रथमप्रवृत्तावेव विश्रान्तिकल्पनाद्दध्या

त्याख्यानम् । अत एव सर्वस्य ह्रे इत्यस्यापि न
नः प्रवृत्तिः सकृत्प्रवृत्तेन द्वित्वेनाभीक्ष्ण्यार्थं बोध्या-
च । अत एव परैर्वर्जन इति वैकल्पिकस्यापि न
नः प्रवृत्तिः । अयमत्र निष्कर्षः । लक्षणस्य पुनः
वस्यप्रवृत्त्योर्व्यक्तिभेदाभेदावलम्ब्य किन्तु सकृल्लक्षणे
ुत्ते निमित्ताभावात् पुनरप्रवृत्तिः । क्वचिदानन्त्या-
क्वचिल्लक्ष्यानुरोधेन वक्त्यादौ प्रथमपुरुषबहुवचना-
शास्त्यसंकोचस्यैव तत्र तत्र लक्षणत्यागकृतप्रवृत्ति-
ति सङ्कोचस्य च कल्पनात यशसुश्नुपास्य इत्यादा-
प्रदेशे यशश्चीत्यादेः पुनरप्रवृत्तिः । रमाया इत्यादौ याट्
ाख्याद्देः । आवोढुमित्यत्र ल्यवादीनामविद्धत्वाद्धल
नवृद्धौ ढादौ सहिवहोरित्यत्वे च कृते प्रसक्तस्या-
पि हलन्तवद्धिधाशास्त्रस्य प्रकृते तूत्सर्गतः प्रवृत्त-
व द्वित्वशास्त्रस्य पुनः प्रवृत्तौ न किञ्चिद्बाधकम् ।
त एवाऽविद्धवत्त्वे टुटौ यशि सिद्धत्वविधायक-
र्तिकप्रत्याख्यानाय वृद्धिविधानसामर्थ्यं वर्णयितुं न
यञ्जनपरस्यैकस्यानेकस्य वा प्रकृतौ विशेषोऽस्तीति
ाष्यकृतोक्तेः । श्रुतिभेदपक्षेऽपि परयो यय इति द्वित्व-
ानाङ्गलो यशामिति पक्षे अलोपविधानात् पक्षे यका-
ङ्गयं भवत्येवेति नार्यो वृटेति । तद्विधानसामर्थ्या-
प्रेण भवतीति कैयटः । इदञ्च द्वित्वस्य पुनः

प्रवृत्तावेव सङ्गच्छते । अन्यथा युट्पक्षे द्वित्वे चिर
रूपं तदभावे ह्रियकारमिति कथं श्रुतिभेदपक्षे
विधानसामर्थ्यं पुन प्रवृत्तौ तु युडभावेपि पुनर्द्वि
वृत्त्या ह्रियकार मिति सामर्थ्यसङ्गतिरिति । अ
नवत्वोक्तिस्तु मूलकृदुदाहृतद्वित्वद्वयानुसारेणेति
पल्लवितेन । यच्च । यदप्युक्तं चैपादिक इत्यादि
तदपि न । नाकुंटो नार्पत्य इत्यत्र विसर्गनिवार
वृद्धेरसिद्धत्वस्य भाष्ये स्पष्टत्वादिति । तन्न । ना
इत्यादौ विसर्गनिवृत्तेर्बहिरङ्गपरिभाषानिराकरणप
वचनेनैव सिद्धिरिति, सांप्रदायिकभाष्यार्थस्य कैय
टकरणात्तत्पक्षेणास्य ग्रन्थस्योपपत्तेः । चैपा
दिकस्य क्वाचित्कत्वैपादिकपरत्वेन बहिरङ्गत्वेन य
त्सिषेध इत्यस्य प्रत्याख्यानस्य सुवचत्वाद्धिति । य
कृण्वादेरित्यत्र त्रिधादिरूपवचनं वृद्धेर्धकारस्य
त्वमिति । ह्रस्वो भलाञ्झशीति झशोऽप्रतिहतप्रसरत
दुक्तन्यायेन जश्त्वसिद्धत्वाच्चोक्तम् ॥

करो झरि—।

यत्तु प्राची विकल्पानुवृत्तेरनुक्तेर्न्यूनतेति तन्
मूलन्यूनतापरिहाराय तद्व्याख्यानेऽन्यतरस्यामित
नुवर्तितत्वात् । कथमन्यथा गुरोरनृत इत्य

दैवदत्त इत्यत्र भवदुदाहरणे व्याख्याने ऽस्य एङ्ह्योत्यादि-
पूरणेऽपि मूले वाक्यानुदाहरणान्न न्यूनता। एवमेव दूरा-
न्ते चेति सूत्रे प्राचोक्तं क्षण एङ्ह्योत्युदाहरणमपि प्रसी-
द्येत्यादिपूरणेन व्याख्येयम्। यच्च यद्यपि व्याख्याद्भिः शरो-
ऽचीति ज्ञापकमुपन्यस्य तत्संवादार्थं भाष्यमुपन्यस्तम्। अ-
नुवर्तते हि विभाषा शरोऽचि यद् वारयत्ययं द्वित्वमिति
तन्न। तदुत्तरभाष्ये एवोक्तज्ञापकस्य दूषितत्वात्। लोपस्य
हि नित्यत्वेऽचोरहाभ्यामिति द्वित्वं लोपापवादः स्यात्
यथा च शरोऽचीत्यस्य सार्थक्यं स्पष्टमेवेत्यादि। तत्र ज्ञा-
पकमुपन्यस्येयनुक्तोपालम्भः। इत्थं हि तेषां ग्रन्थः।
वैकल्पेनायं लोप इति काशिकादौ स्थितम्। तथा
च भाष्यम्। अनुवर्तत इत्यादि। तथा च लोपस्य वैक-
ल्पिकत्व एव भाष्यसंवादस्तेषामभिप्रेतो न तु शरो-
ऽचीत्यस्य ज्ञापकत्वेऽपि तद्वाक्यनिविष्टत्वेन परं तत्लेखः।
अत एव कैयटोऽपि लोपो विकल्पेनेत्याहेति लोपस्य
वैकल्पिकत्वमात्रांश एव कैयटसंवादस्तैरुपन्यस्तः।
यत्तु द्वित्वविधानाद्धावेव शिष्यत इत्यत्र लोपस्य वैक-
ल्पिकत्वेन द्वित्वस्य चरितार्थत्वादिति दूषणं तत् तदाश-
यानवबोधात्। अचो रहाभ्यामिति द्वित्वे द्वयोः स्थाने
न स्याल्लोपेनैकस्यापहारादित्याशङ्कायां द्वित्वविधाना-
दिति ग्रन्थस्तदर्थस्य द्वित्वविधानसामर्थ्याल्लोपस्य वैक-

लिपकत्वात् पक्षे द्वयोः श्रवणमिति द्वित्वविधानं लो
वैकल्पिकत्वज्ञानद्वारा द्वयोरेव शेषि हेतुरिति तदा
वृति । प्राटूढोढो । अत्र क्तान्तस्योढशब्दस्यार्थव
ग्रहणं ज्ञापकमर्थवद्ग्रहणेनानर्थकस्येत्यचेति सी
वः । यत्तु नन्वेतदयुक्तम् । फणादिना राजिना सा
चर्यात्तस्यैव सत्वार्थतया भ्राजिग्रहणस्योपस्थीणत्वादि
क्षेन्न । विभ्राट् विभ्राजिति हि रूपद्वयं साध्यम् ।
अश्वादिसूत्रे राज् इति पठित्वाऽपि सुसाधमेकस्य भा
तैर्ङ्टकारस्य प्रागपि दातुं शक्यत्वात् । भ्राजस
क्षेति विकल्पस्यात्मनेपदमात्रफलकताया वक्ष्यम
क्षेन तत्स्थानेऽकारस्य सुपठत्वाच्चेति । तचाश
तावदतिनिर्दला । अर्थवद्ग्रहणपरिभाषाभावे ब्रह्मं
सूत्रेऽफणादिभ्राज्येकादेशस्यापि राजेः सत्वेन फ
क्षेरेव ग्रहणमिति नियामकाभावेन तत्साहचर्येण
णादिभ्राजिग्रहणार्थं भ्राजिग्रहणमित्यख्यानाशङ्क्य
त् । भ्राजेः फणादेरेव ग्रहणमिति नियमे
राजिग्रहणे फणादेर्ग्रहणासम्भवेन क्लिन्तदुव्यावृत्तये
णिसाहचर्येण फणादेरेव भ्राजेर्ग्रहणार्थं भ्राजि
णेनेति । राजिसाहचर्यात् फणादेर्ग्रहणमित्याक
न्यात्त्वर्थग्रहणपरिभाषायां स्थितायामिति न तद्
यः । एवं च सूत्रघातन्यासभङ्गेन समाधानमपि नि

। किंच राजृ इति सानुबन्धकनिर्देशे यङ्लुकि रारा-
त्यादौ षत्वं न स्यात् । किञ्चैवं भ्राजिर्यङ्लुगं न स्या-
दारब्ध समुदायानुबन्धत्वादिति दिक् । यद्प्युपस-
र्ग एव धातोराक्षेपे सिद्धे इति प्रतीकमुपादाय तद्धेतु-
न व्याख्यायां यत्क्रियायुक्ताः प्राद्यस्तं प्रत्येव गत्युप-
र्गसञ्ज्ञा इत्युक्त्वादित्युपन्यसनं तदपि मुधा । उप-
र्गाः क्रियायोग इति यथाश्रुतसूचादेव धातोराक्षे-
सम्भवात् ।

एङि परूपम् ।

अत्र प्रेजतीति मूलोदाहरणमभिप्रेत्य एजृ
म्पन इति प्रकाश्यः । कम्पनार्थस्यैजतेः परस्मैपद-
दिति बोध्यम् । एवे च । अनियोगोऽवधारण-
भन्ने सम्भावने तथा च ॥

अनवक्लृप्तौ यदा दृष्टः परूपस्य गोचरः ।
एषस्तु विषयो दृष्टेर्नियमेऽयं यदा भवेत् ॥

इति श्लोकवार्त्तिकमिति प्रकाश्यः । तत्र दृष्टौ
वं वार्त्तिकम् । अध्यात्मादित्वाद्दृश् बोध्यम् । तेन
वार्त्तिकोक्तौ रभसादिति केषाञ्चिदुक्तिः सैव रभसि-
कीति ध्येयम् । यत्तु शकन्ध्वादिष्वित्यत्र टिसञ्ज्ञासू-
त्रोदाहरणम् । तट्टिसञ्ज्ञाप्रयुक्तकार्याभावादनुचितम् ।

अव्यक्तानु—।

अत्वतः किं दकारान्ते मा भूदिति प्राचोः प्रश्नोत्तरयोर्निरालम्बनत्वमिति । तच्चात इति ह्रस्वाकारनिर्देशः । अतो गुण इत्यत एव तदनुवृत्तेरस्यानर्थक्यापत्तेः । नाम्रेडितस्येति ज्ञापकाच्च । तदाकारनिर्देशे आम्रेडितनिषेधोऽकारस्य स एवाऽदिति विकल्पोऽपि तस्यैव स्यादिति निषेधविकल्पयोरेकविषयत्वापत्तिरिति तकारान्तनिर्देशो वाच्यः तच्च प्रतिपत्तिलाघवायाद इत्येव निर्देश्यमुदाहरन्ति च झलां जशोऽन्त इति जशि कृते ऽदःसम्भवात्। रोसुन्यायेन च जशोऽसिद्धत्वाभावादिति प्रश्नाशयः । तच्च अस्य जश्त्वं विना अदकारान्तमनुकरणं तच्च मा भूदित्यर्थः। एवंच तच्च परुषस्य चरितार्थत्वाद्रोरुत्वस्याभावेन जशोऽसिद्धत्वात्तकारान्ते न स्यादिति द्रष्टव्यम् । तपरस्तत्कालस्येत्यत्र दकारश्लेषपक्षे त्वद इति निर्देशेऽपि ह्रस्वाकारपरत्वसम्भवात्तन्निवृत्तये सुतरामनुसन्धानावश्यकत्वे प्रतिपत्तिलाघवस्याभाव इत्यपि द्रष्टव्यमिति कथं प्रश्नोत्तरयोर्निरालम्बनत्वमिति यदपि यत्तु व्याचख्युः । अतो गुण इत्यतोऽत इत्यनुवृत्ताधिकारात् सिद्धमिति प्रश्नः । यद्वा अस्य जश्त्ववशाद्ध

वं तदापि स्यात् पुनरद्ग्रहणे तु तान्तत्वस्य विव-
ाभ्नेत्युत्तरमिति । तच्चिन्त्यम् । जश्त्वशास्त्रस्या-
ःत्वेन पररूपस्यैव प्रवृत्तेः । नाम्रेडितस्येति निषेधे
पटदितीत्युदाहरणस्यासम्बद्धत्वापत्तेश्च । तत्र
भवदुक्तरीत्याप्राप्तिरेव नास्ति दान्तत्वादिति
पे न । जश्त्वशास्त्रस्यासिद्धत्वेऽपि पुन-
ाहणेन जश्त्वाविषय- तात्पर्येण पररूपाप्राप्तेः ।
एव व्याख्यातृभिरत इत्यनुवृत्तेऽपि यदा
ुञदस्य जश्त्ववशाद्धान्तत्वं तदापि स्याञ्ज-
ास्यासिद्धत्वाद्भवत्ययमच्छब्द इति प्राप्तौ-
। पुनरद्ग्रहणेन त्वत इत्यस्य विशेषणात्ता-
वविवक्षार्थान्न भविष्यतीत्युक्तम् । तन्न दान्त-
मत्यस्य सम्भाव्यत इति शेषः । अन्यथा दान्तत्वे
त्वासिद्धत्वोक्तिरसंभाववती स्यात् । तान्तत्वस्य
क्षार्थादित्यस्य जश्त्वाविषय विवक्षार्थादित्यर्थः ।
था पुनरद्ग्रहणाभावेऽपि तान्तत्वविवक्षासम्भवा-
रद्ग्रहणेन तु इत्यसम्बद्धं स्यात् । अत एव हरद-
पि पटदितीत्यत्र परूपमाशङ्क्य काशिकायाम-
हतं दकारान्तानुकरणमेतदिति प्रतीकमुपादाय
रान्तानुकरणे रूपमेवैतन्न स्यादपदत्वे जश्त्वा-
ाद्व्यथा पटिति करोतीत्याह । पटत्पटदित्यन्त्यप-
ाविकल्पे ऽभावोदाहरणम् । तत्र द्वितीयाद्ग्रहणा-
धश्चुत्यस्य व्याख्यातृभिरेवोक्तत्वात् । अन्त्यपर-

रूपनिषेधोदाहरणन्तु पटत्पटेतीति नाम्नेऽडि दूषणस्याप्ययुक्तकत्वात् । अन्यैकाचो नेत्यस्य यदि ति कथमुदाहरणमिति तु चिन्त्यम् ॥

अवक:—

अत्राक्रोऽकिदीर्घ इत्येव सुवचमिति केचित् । य संख्यासम्बन्धेनैवाखण्डार्थकयाञ् सिरिति तेषां भाव तच्चिन्त्यम् । तथा सति ऋति ऋ वेत्यादिवार्ति रुपयमुपन्यस्ते दधि ऋकार इत्यादावतिप्रसङ्गवार याधिकस्य सवर्णग्रहणस्य सूत्रे चाकीत्यस्य करणेऽ गौरवात् ॥

सर्वत्र विभाषा गोः ॥

अवङ् स्फोटायन—।

अत्र हे चित्रगो इत्यादाववङ्प्रकृतिभावयोरभा स्थानिवत्त्वनिषेधस्वीकारावश्यकत्वात् तेनैव चित्र अग्नित्यादावपि तयोरप्रवृत्तौ यत् कैश्चिदेङ इ तदर्थमनुवर्ति तन्निष्फलम् । न चैङनुवृत्तौ लाक्षणि त्वाच्चित्रगो इत्येङस्तयोरप्रवृत्तौ स्थानिवत्त्वनिषे नावश्यक इति वाच्यम् । आदेच इत्यत्र चेतेत्यादिव क्षणिकत्वेनैचो वारणफलकस्योपदेशग्रहणस्य वर्णग्र लक्षणमतिपदोक्तपरिभाषाया अप्रवृत्तिज्ञापकत्वात

अन्यथा चक्रे इत्यादिप्रतिपदोक्त एवैङः पदान्तादित्या-
दि प्रवर्तेत न हरे इत्यादौ । अन्यत्र स्वयमपि तथा-
भ्युपगमाच्च । न च गोः पूर्वत्व इति वार्त्तिके पूर्वरूप
एव स्थानिवद्भावनिषेधस्योक्तत्वेन पूर्वरूपमेवानिष्टमि-
ति प्रतीयते न त्ववङ्प्रकृतिभावाविति कथं तयोरप्र-
वृत्तये स्थानिवत्त्वनिषेध आवश्यक इति वाच्यम् ।
एवमप्येङनुवृत्तिप्रयोजनानुक्तेः । चित्रगवश्रमिति वार्त्ति-
कोदाहरणे भाष्योक्ते एङः पदान्तादतीति पूर्वरूपस्या-
विधित्वेन तदप्रवृत्तये वार्त्तिकस्यासम्भवनीयत्वेन
तत्पूर्वरूपपदस्य पूर्वरूपबाधकावङ्प्रकृतिभावपरत्वा-
च्च । न चैवमपि सर्वत्र विभाषेति सूत्रस्यैव भाष्ये
उदाहरणात् प्रकृतिभावपरत्वे ऽपि पूर्वरूपस्यावङ्पर-
त्वे किं मानमिति कुतोऽवङोऽनिष्टत्वमिति वाच्यम् ।
एवमप्येङनुवृत्तेर्निष्फलत्वस्यापरिहारात् । न चावङ्-
सूत्रे ऽवक्तव्यः स्वरसिद्ध्यर्थमिति वार्त्तिककृता
गवाग्रमिति बहुव्रीहौ गोशब्दौकारस्योदात्तस्यावङ्
कदाचिदन्तो दात्तोऽपि स्यादित्यगागसोऽवङ्समान-
रूपबाधक उक्तः भाष्ये च तत्प्रत्याख्यानायाद्युदात्तो-
ऽवङ् निपात्यत इत्युक्तम् । एवं च चित्रगवग्रमित्यत्राव-
ङोरूपभेदात् स्वरसिद्धिमाश्रित्याप्युक्तिप्रयोजनोक्तिः कथं
वार्त्तिककृतः सङ्गच्छताम् । कथं वाद्युदात्तनिपातन-

माङ्येतत्प्रत्याख्यानं भाष्यकृत इति तच्चावङोऽ
स्यासन्निवृत्तये ऽवङ्विधाने एङनुवृत्तिः । चित्रं
मित्यत्र स्वयङ इत्यत्वे किं बाधकमिति नावङ्
यस्यनिषेध इति वाच्यम् । आद्युदात्तनिपात
श्चक्षमाणस्वरः साध्यः स चावङ्स्वीकारे न सिध्
श्चत्यामन्त्रितस्वरेणाद्युदात्तत्वादवङि गकारा
र्ति शिष्टेोदात्तत्वादिति स्वरभेदात् । न च गवा
त्यादावङ आद्युदात्तत्वस्य श्रवणं भा भूदिति तस्ये
शिवद्भावो वाच्य इति समासान्तोदात्तादिवाम
ताद्युदात्तादपि प्रागवङ्स्वरप्रवृत्तौ पश्चादाम
स्वरे स्वरभेदाभाव इति वाच्यम् । उपदेशिवद्
हि समकालप्रवृत्तिकस्य परत्वेन प्रथमं प्राप्तस्य
सस्वरस्य प्रागप्रवृत्तिः क्रियत इति कैयटादिभिर्यो
तप्चात् समासान्तोदात्तत्वेन न बाध्यत इति
नोक्तेरन्तरङ्गबाधेनोपपत्तौ तद्बाधकल्पनस्यान्य
त्याच्च । अन्तरङ्गस्य प्रथमप्राप्तस्यामन्त्रितस्वरस्य
स्वरात् प्राक् प्रवृत्तौ बाधकाभावात् । तस्मादुक्तो
रणेऽवङ्प्रकृतिभावयोरनिष्टयोरभावः स्यानिवत्त
धेधेनैव साध्य इति तद्विधाने एङनुवृत्तिर्निष्फ
अत एव माधवेन चित्रगध्यमित्यत्र स्यानिवत्त्वाभ
नैव तयोरप्रवृत्तिरुक्तेत्यलम् । यच्चायङ्सूत्रे पद
किं गवीति प्रत्युदाहृत्य गवे इति प्रत्युदाह

युक्तं परस्पेणाप्येतत्सिद्धे रित्युक्तम् । तत्तदाशया-वबोधात् । न हि गवे इति ङयि सिद्धं रूपं तदा-श्रयविषयः किन्तु ङावापाद्यम् । तथा च ङौ गवे इति स्यादित्यध्याहारेण प्रत्युदाहरणवाक्यार्थः । गवीति प्रत्युदाहरणमपि प्रत्नावद् मा भूदिति अध्याहारेणैव योजनीयम् । अन्यथा ऽनन्वयात् । प्रायशश्च प्रत्युदा-हरणवाक्येष्वध्याहारेणैव योजनमित्यलम् । यत्तु सर्वत्र विभाषेति प्रकृतिभावमुक्त्वा ल्पुतप्रगृह्या इत्यतः पूर्वमय प्रकृतिभाव इति वचनम् । तदनवधानात् । हराद्धृते च गौरनृत एतत्सूत्रद्वये यद्वक्तव्यं तज्झरो झरीति सूत्रे उक्तम् ॥

ईद्ऊदेत्—।

अत्र द्विवचनान्तं प्रगृह्यमिति प्राचः प्रवाद इति केचित् । तन्न । द्विवचनमित्येव प्रायशः पाठात् । अत एव ईद्ऊद्द्विवचनस्य विशेषणं तेन च तदन्तवि-धिरित्याह । ईद्ऊदेदन्तमितीति प्रकाशः । द्विवचना-न्तमिति पाठेऽपि इहान्तशब्दः स्वरूपवाची । अन्तं स्वरूपे ना न स्त्री शेषेऽन्तिके त्रिषु इति मेदिनीको-शात् । तेन च द्विवचनशब्दस्य कर्मधारयः । तेन कु-मार्यौरगारमित्यादावनतिप्रसङ्गात । सुप्तिङन्तमि-

त्यन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभा
वेऽपि क्षत्यभावाच्चेति ॥

ॐ ।

यच्चास्यानुनासिकत्वे यद्धेतनूं इत्यत्रानुनासिकार्थं
कृतं यरोऽनुनासिक इत्यत्रानुनासिकग्रहणं प्रमाणम् ।
अन्यथा यरो यमि यञ्चेत्येवावक्ष्यदिति । तन्न । एवं
हि निर्देशे यथासंख्यप्रतीतौ एतन्मुरारित्यत्रानुनासि-
को न स्यात् । अत्र हि जातिपक्षाश्रयणस्यावश्यकत्वे-
नैतन्नयनमित्यादौ चरितार्थोऽयं चतुर्मुख इत्यादा-
विषेहापि न प्रवर्तते । अनितेः क्विबपि सम्बुद्धौ आन्
चिनोति इत्यत्र नश्छव्यप्रशान्निति हत्वे अत्रानुनासिक इति
पूर्वस्यानुनासिके यद्धेतनांश्चिनोतीत्यत्रानुनासिको न-
स्याच्चेति ॥

अथ उञः—

अयः परादिति पञ्चम्यन्तस्योञ्विशेषणत्वे उञ इति
षष्ठ्यभावादुञः स्थानिवद्दुर्घटत्वादिति केचित् ।
तन्न । अय गतावितिधातोः प्रत्याहारस्य च
अयः शब्दात् प्रकृते कलरो मय् गृह्यत इत्यतो
मद्विशेषणत्वेन परादित्यस्य प्राप्यं क्षयणात् ।

ाकारं राति ददाति ग्राहयतीति तदर्थात् प्रत्याहा-
हणमिति प्राचो भावादुञ् इत्यस्य षष्ठ्यन्तत्वे बाध-
नावात् । प्रत्याहारग्रहणे हेतुश्च बहुविषयसंग्रह-
। दिक् ॥

इत्यच्सन्धिः ।

यरोऽनु—।

यत्तु यक्ष प्राचा यटि नित्यं पठितं यच्च हल-
ाकरणे षणां षड् णामित्युदाहृतम् । यच्च यरोऽनु-
ेक इति धानुनाषिक इति व्याख्यातं तत्सर्वं
ाथे भाषार्यां नित्यमिति भाष्यविरोधादुपेक्ष्यमिति
ंत् । तन्न । यटीत्यस्य प्रत्ययमात्रोपलक्षणत्वा-
षड् णामिति स्थितिप्रदर्शनम् । परिनिष्ठितं च
ाणिति व्याख्यातत्वात् । एवंच वानुनासिक इति
ो व्याख्यानं चिन्त्यमिति प्रकाशकृद्भिरेवोक्त-
ं प्राचोक्तौ तद्व्याख्यातुरुक्तौ च न कश्चित्
ोपद्रवः । अत्र यदि भं तसौ मत्वर्थ इति संहि-
ाठे तसाविति तात् पूर्वं दकारं श्लिष्य भत्वेन
ुमन्त इत्यत्र नानुनासिक इति समादधुः । यत्तु
ारप्रश्लेषे मृज्मानित्यादावतिप्रसङ्ग इति तत्तुच्छम् ।

अय इति मतुपो मस्य [1]वत्वावश्यंभावान्मृन्मानिति रूपस्यैवासिद्धेः ॥

उद्द: स्थास्त—

सकारस्य पूर्वसवर्णस्तकार इति हरदत्तमाधवाद्वयः । यद्यपि महाप्राणत्वघटितान्तर्यवांस्यात्राकार इहोचितस्तथाप्युद: परस्य स्कन्दे: सस्य पूर्वसवर्णविधायकस्य रोरेवेति वार्त्तिकस्योत्कन्दी रोग इति भाष्यस्योदाहरणे यकारात्रवणान्महाप्राणत्वाघटितान्तर्यमिह पूर्वसवर्णनियामकमिति सामान्यतो ज्ञाप्यत इति तेषां भाव: । उत्कोदाहरणे यकारश्रवणं सन्दिग्धं ज्ञापकञ्चोत्कन्द इत्युदाहरणविशेषमाश्रवि-षयकमिति वादिनाम्मते तु सस्य य इति मतं हरदत्तादिभिरन्येत्वित्यनेनोपन्यस्तमिति । एवञ्च सकारस्य तकार इति प्राचां ग्रन्था: प्रत्युक्ता इति [2]निरस्तम् । यदपि चयो द्वितीया: शरीत्यस्योपन्यसनं तदर्तिरभ-सादिति । तन्न । अन्ये तु द्वियकारं रूपमाहुरित्युक्त्वा न चैतदप्रामाणिकम् । चयो द्वितीया: शरि पौष्कर-सादेरिति सत्वे यकारश्रुतेरवर्जनीयत्वादिति हि प्रकाशकृद्भिरुपन्यस्तम् । तन्न रांभस्ये पूर्वसवर्णतकारस्यासिद्धत्वं शर्परत्वाभावो वा हेतु: स्यात् स च न सम्भ-

। । उद्दृस्तकारस्य अकारः पूर्वसवर्णलकारस्य च
। ऋरीति लोप इति द्वितीयकारकं रूपमिति तद्-
याख्यातम् । न चोद्दृतस्य चर्त्वभूतस्य अकारं प्रत्य-
च्रुत्वं चयो द्वितीया इत्यस्य कार्यिकायां भवत्वित्व-
राहरणस्योदाहृतत्वेन यं प्रति चर्त्वस्य नसुने इत्य-
च्रुत्वाभावात् । नादिन्याक्रोश इत्यत ऊर्ध्वमुद
ातः पूर्वं चयो द्वितीया इत्यस्य भाष्ये पाठात्तस्य
कार्यिकोदाहरणोपपत्तेश्च उक्तदेशत्वकल्पना-
ति ॥

शश्छोऽटि ।

तत्तु थिव इत्यत्र जश्त्वे कृते इति प्रक्रियाकौ-
ी थिवबन्तत्तनोतिनिष्पन्नताच्छब्दरूपत्वेन प्रकाशे
ख्याता तेन न द्वान्तस्य जश्त्वोपन्यासवैयर्थ्यदो-
। न चैवमपि चर्त्वमुपन्यस्य च्रुत्वोपन्यासो विरुद्धः ।
वं प्रति चर्त्वस्याविद्धत्वादिति केचित् । तन्न ।
ोपन्यासे चर्त्वच्रुत्वक्रमस्याविवक्षितत्वात् । कथम-
ाथा भवतोऽपि च्रुत्वमुपन्यस्य च्रुत्वचर्त्वोपन्यासः
ुच्छतास् । च्रुत्वपोमन्यन्त इत्युक्त्या अगतिकगति-
स्येहाप्याश्रयणे प्रमाणाभाव इत्यस्वरसः प्रकाशित
ति न कश्चित् क्षुद्रोपद्रवः ॥

ङः सि धुट् ।

धुटश्चतुर्थेन तकारः । यस्तु तस्य चयो द्वितीया इति पक्षे य इति तन्न । चर्त्वस्यासिद्धत्वादिति केचित् तन्न । उद्दः ख्येत्यत्रोक्तदूषणग्रस्तत्वात् । अत एव धुं भृते चर्त्वं तस्य पूर्ववत् पक्षे य इति हरदत्तः । अत एव प्रक्रियालाघवार्थं तुल्य एव विधेये धुट्करणं वैयाकरणसिद्धान्तमञ्जर्यामिति प्रकाशोक्तं सङ्गच्छते । न सङ्गच्छते च तत्र चयो द्वितीया इति पक्षे यकारापत्तिदूषणांधुट प यकारस्यैष्टत्वात् असङ्गतं च धुङभावपक्षे षट् सम् ङ्स्थञ्च टस्य ठो नेति । तत्रापि पक्षे ठस्येष्टत्वादिति नश्च ।

नकारात् परस्य यस्य धुङ् वेत्याचार्यः । यत्र अधिकृतपदविशेषणं न इतीति तदन्तविधिना नकारान्तादिति विवरणम् । तत्र पदानुवृत्तौ प्रयोजनं चिन्त्यम् । यदि तु ङमो ह्रस्वादित्यादौ तदनुवृत्त्यनुरोधेनेहापि तदनुवृत्तिरिति तदा ङ्णोः कुक्टुक् शर्ङः सि धुट् इत्यत्रापि तदनुवृत्त्यावश्यकत्वे ङकारणकारयोरिति ङात् परस्येति च विवरणानौचित्यात् कथं तर्हि ग्धि तुगित्यत्र नस्य पदान्तस्येति प्रक्रिया कौमुदीति चेत् तत्र पदान्तग्रहणरहितपाठस्यैव प्राय

र्थनात् क्वाचित्कतयापाठेऽपि अपदान्तनकार-
स्वारेण भाव्यमिति पदान्तस्यैव तुगितिव्युत्पा-
अपरत्वेनाधिकृतपदग्रहणाविघातात् । अत एव
रान्तस्येति न विवृतम् । नश्चेत्यत्रापि धुतौ
व्युत्पादितमिति चेन्न । एकजातीयस्यार्थस्यैक-
ुत्पादनेनैवान्यत्र तदवगमात् । न चैवं समानि
रान्तादिति व्युत्पादनमिति वाच्यम् । पदाधि-
भावे न इत्यस्य विशेषणत्वाभावेन तदन्तविधि-
ङ्गत्यं स्यादिति । पदाधिकारलभ्यस्य तदन्तवि-
ध्यान्यत्रापि तदन्तोपलक्षणत्वे तु कथंचित् समा-
ऽपि पदादित्यनुक्तेर्न्यूनतेति बोध्यम् ॥

श्रि तुक् ।

अत्र तुकः पूर्वान्तत्वात् कुर्वन्त्रश्नेते इत्यत्र पदा-
तेति णत्वनिषेधो न स्यादिति पूर्वपक्षे हलो:
श्नुरित्यत्र हलो: श्नुनेति योगविभागे को नेत्तदनु-
श्नुना योगे हलोर्णत्वनिषेध इति समाधानम् ।
नश्चेत्यत्र धुट:परादित्वे कुर्वन् शीङ्तीत्यत्र
न्तस्येति णत्वनिषेधः प्रयोजनमिति प्राचां ग्रन्थः ।
अहिरङ्गपरिभाषया गतार्थमिदमुभयथेति प्रकाशः

कार्यकालपक्षमाश्रित्येति बोध्यम् । यत्तु तच्च नैपादि-केऽन्तरङ्गे परिभाषेयं न प्रवर्त्तत इति बुध्युपास्य इत्यु-दाहरणे स्वोक्तया सह विरोध इति । तन्न । तच्च नैपादिक इत्यस्य क्वाचित्कनैपादिकपरत्वेन तया-ख्यानेनाविरोधादिति । खञ्छस्भ्रुरित्यत्र ॥

जश्शौ जसश्च जसश्च जश्शाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

इति केचित् । तच्च चयो द्वितीया इति खत्वविक-ल्पनाद्रूपद्वयबुद्धिर्बंध्या ॥

कुम्भः—।

अत्र लाघवात् । कुम्भो ह्रस्वाद्यचि ङे इति सूत्रयणी-यम् । कुर्वन्नास्ते इत्यादौ तु बहिरङ्गस्यद्वित्वस्यासिद्ध-त्वेन पदान्तस्येति खत्वनिषेधसंभवात् । राज्ञ इत्या-दौ नैपादिकेऽन्तरङ्गे यथोद्देशपक्षाश्रयणेन बहिरङ्ग-परिभाषाऽप्रवृत्तिस्वीकारेऽपि नार्कुट इत्यादौ नैपा-दिके विसर्जनीय इत्यत्र खत्वनिषेधे लाघवानुरोधेन कार्यकालपक्षाश्रयणे तत्प्रवृत्तिस्वीकारौचित्यादिति प्रकाशकृतः । अयमेतावद्ववधेयम् । नित्यग्रहणस्य विरुपसूत्रार्थत्वेन करणाकरणे न्यायद्वयेऽपि तुल्येऽवशि-ष्टभागेऽर्द्धमात्रालाघवायोक्तमतिपत्तिगौरवसहनं न खल्

त्कारकारि । तस्मान्मात्रालाघवाय द्वौ अचि
नूङम इति सूत्रयितव्यम् । यत्तु परमदण्डिना-
दौ अन्तर्वर्त्तिविभक्तया पदत्वान्नुट् स्यादिति ।
। नुटो नलोपं प्रत्यसिद्धत्वेन नलोपापादनस्यै-
तत्त्वादिति । अचानुनासिकः अनुनासिकात्
ति सूचयो रोः पूर्वस्येति रोः पूर्वस्मादिति चो-
व्याख्यानेऽपि हशब्दस्योपलक्षणत्वमनुक्त्वा
लोपे केषांचिदनुनासिकानुस्वारयोरूपमानवधा-
। संपुंकानामिति । यत्तु पुंस्कोकिल इत्यादा-
पत्तिपक्षे षत्वप्राप्तौ संपुङ्कानामिति स इति
। पुंमुहुषोःषत्वप्रतिषेधात् । सति हि सवचने
षत्वनिवृत्तौपुनः षत्वनिषेधोऽनर्थकः । तदभावे
यावश्यक त्वादिति । न चैवमपि पुंस्त्वमि-
ह्रस्वात्तादौ तद्धित इति षत्वनिवृत्त्यर्थमयं
रः स्यादिति वाच्यम् । कृतेऽपि सकारे तस्य
र्गः । डुकःत्यनुरोधेन विसर्जनीयस्यानिकत्वात्
र्जनीयस्थानिकस्येदुदुपधस्येति षस्य निवृत्तावपि-
दिति सस्थानिकस्याजिवृत्तेः । का तर्हि पुंस्त्व-
ादौ षत्वाभावाय गतिरिति चेद्यियम् । डुदुप-
त्यस्य पुंमुहुषोः प्रतिषेध इति वचने पुंग्रहणं
षत्वनिवृत्त्यर्थं सकारविधानादेव तन्निवृत्तेः खि-
ादिति हल्त्वादिति षत्वनि वृत्त्यर्थं तस्मात्

पुंस्त्वमित्यादौ वाचनिकी षत्वनिवृत्तिरिति । इदमेवाभिसन्धाय ह्रस्वात्सादाविति सूत्रे पुंसःप्रतिषेधः पुंस्त्वं पुंस्तेति हरदत्तो व्याजहार । तस्य भाव इति सूत्रे पुंस्त्वमिति भाष्योदाहरणन्तु न षत्वाभावज्ञापकम् । अनुस्वारपक्षे ह्रस्वात् परत्वाभावेन षत्वाभावे तदुदाहरणसंभवात् । वस्तुतस्तु समादीनां रोर्विसर्जनीयस्य वा सविधानापेक्षया तेषां साक्षात्सविधानमुचितम् । तच्चैवं समः सुटीत्यत्र सकारान्तरश्लेषात् समः सकारो विधीयते स एव पुमःखयीत्यत्रानुवर्त्तते कानाम्रेडित इत्यत्र च मण्डूकप्लुत्येति । न चैवं कानः सस्य रुप्रकरणबहिर्भावात्ततः पूर्वस्य कथमनुनासिकादि । अनुनासिकानुस्वारयोस्तावत्पर्यन्तमधिकृतत्वात् । एवं सति कान एव रोः सवचनारम्भेऽपि संपुमोर्वचनानर्थक्याच्च कांस्कानित्यस्य कस्कादित्वे तु तदर्थमपि न सवचनारम्भ इति ॥

पुमः—।

इह ख्याधातौ नेति केचिदिति मक्रियाग्रन्थोऽयं निर्बाधस्तथा तत्प्रदीपादवधेयम् ॥

कुप्वोः—।

यत्तु प्राचा विकल्प इत्युक्तम् । तन्न ।×क×पाभ्यां-

सत्वप्रसङ्गादिति । सोऽयमनुक्तोपालम्भः । चा-
इत्येव पाठात् क्वाचित्के तथा पाठे ऽपि
ष्टे विसर्गे ≍क≍पयोर्विकल्पः फलतीत्यर्थः ॥

कस्का—।

≍क≍पयोरपवाद इति केषांचिद् ग्रन्थे विसर्ज-
। चेति शेषः । न च कस्कादेराकृतिगणत्वात्
र्तित्यस्यापि कस्कादित्वादेव सत्वं कुतो नेति
म् । वचनेन कस्कादित्वकल्पनेन वा सकार-
विशेषाभावात् । संस्कर्त्तेत्याद्यर्थं समः सवचन-
त्यकत्वाच्चेत्यवधेयम् ॥

इति हल्सन्धिः ।

नु सोऽपदादाविति सूत्रेऽपदाद्योःकुप्वोरितिम-
ाकमुपादायोक्तं सूत्रे तु व्यत्ययेनैकवचनम् । यदि
र्वशेष्यते ऽपदादौ खरीति तदा यथाश्रुतं साधु ।
खरीति मण्डूकप्लुत्याऽनुवर्त्यमिति क्लेश इति ।
। खरीत्यनुवृत्तावपि कुप्वोरिति न समानाधि-
भिन्नवचनत्वादिति षष्ठ्यन्त वाच्यम् । षष्ठ्य-
न्तर्गतत्वं तथा च कुप्वन्तर्गतेऽपदादौ खरी-
फलितस्तथा च खरीत्यननुवृत्तावपि का क्षति-
मण्डूकप्लुतिलक्षेशः स्यात् । एवं खर्विशेष्यतेऽ-
खरीत्युत्प्रेक्षणमप्यनुचितमिति चिन्त्यम् ।

अत एव कुप्वोः ×कः ×पौ खेति सूत्रे कुप्वोरिति षष्ठ्यं
व्याख्यातार्चार्यैः । सप्तम्यां हि सत्यामपदादाविति
च व्यत्ययापत्तेरिति । इदुदुपधस्य चाप्रत्यय
स्येति प्रत्ययस्य यो विसर्जनीयो न भवतीत्याकरः
प्रत्ययस्येति समानाधिकरणं विसर्जनीयविशेषणा
मित्यन्ये । तन्न । सर्पिष्करोतीत्यत्र सुप्योःसामर्थ्य
इति वैकल्पिकषत्वप्रवृत्तावपि तिष्ठतु सर्पिः पिब
त्वसुदकमित्यत्रेदुदुपधस्येति नित्यषत्वप्रसङ्गात् । न
चेष्टापत्तिः । आकरमते प्युणादीनामव्युत्पत्त्याश्रयणं
तथा स्वीकारादिति वाच्यम् । व्युत्पत्त्याश्रयणे दोष
तादवस्थ्यात् । इक्षुधीरित्यत्र सर्पिष्करोतीत्युदाहरणेः
व्युत्पत्तिपक्षस्यैवाचाकरस्वीकृतत्वानुमानात् । अन्यथे
दुदुपधस्येति षत्वस्येष्टत्वे कस्कादिषु सर्पिष्कुण्डि
कात्यशब्दोऽप्रसाधे व्यपेक्षाविरहेऽपि षत्वार्थं इति स्व
ग्रन्थविरोधः । अपि च इणः ष इति सूत्रे सर्पिष्या
दावित्याद्युदाहरणा सङ्गतेः इदुदुपधस्येत्यनेनैवष
त्वसिद्धेरित्यलम् ॥

इति विसर्गसन्धिः ॥

ससजुषो रुः ।

च पदस्येति वर्त्तते तच्च सेन विशेष्यते । तेन येन वि-
ारिति तदन्तग्रहणात् सान्तस्य पदस्येत्यर्थः । ततोऽलो-
न्त्यपरिभाषया सान्तस्य पदान्तस्येत्यर्थः । सजुषा तु
विशेषणे ग्रहणवतेति तदन्तग्रहणनिषेधात् ।
जुष्शब्दस्य पदस्येत्यर्थः स्यात् । तथा सति परमस-
रेत्यादौ रुर्न स्यादिति परस्परानन्वितमेव पदस्ये-
। सजुषद्भुति च स्थानषष्ठ्यन्तम् । तच्चालोन्त्यपरिभा-
ा स्वस्वान्त्यपरम् । तच्च सान्तपदाद्यन्तस्य कविधिसाम-
र्ति परस्परभेदेनान्वितम् । एतदर्थक एव सजुष्श-
ो यत् पदमिति तादात्म्यं च द्भुति प्रकाशः तच्च सजु-
ाब्दस्य पदशब्दस्य च स्वस्वान्त्यपरत्वात् । तथा च पदा-
स्य सजुषन्तस्य च रुः स्यादिति फलितं व्याचष्टे । पदान्त-
ति । सजुष्शब्दस्य चेति । षस्येत्यपेक्ष्यत द्भुति प्रका-
। यत्तु सजुषा पदं विशेष्यते सजुषन्तं यत् पदं तस्य
रुः स चालोन्त्यस्य । न च ग्रहणवतेति तदन्तविधि-
षेधः । प्रत्ययविधिविषयकोऽयं निषेध द्भुति दिव उ-
ौ कौण्डभट्टरदत्ताभ्यामुक्तत्वात् । एवं स्थिते द्भुह
ाष्शब्देन तदन्तविधिर्नेति प्राचामुक्तिरापातत द्भुति ।
। ग्रहणवता प्रातिपदिकेन तदन्तविधिव्यपदेशि-

वद्भावयोः प्रतिषेधः सामान्यविषय इति सीरदेवेन म
न्तरत्वेनोक्तमिति तदभिप्रायकत्वात् प्राचामुक्तेः । दि
उत्वे चे कैय्यटोक्त्युपन्यासस्त्वातिरभसात् । न चैवं दि
दित्यत्र दिवा समासैकदेशस्य पदस्य विशेषणात् तद
विधिर्न स्यात् तथा च विमलदिद्युदिति न सिध्येदि
वाच्यम् । पारिभाषिकस्यानित्यत्वादिह निषेधाप्रवृ
अत एव निषेधस्य विशेष विषयत्वेऽपि मेघर्तीत्यादिख
दिप्रत्ययविधावपि भयाद्यादिग्रहणमुपपदविशेषणं
विधिरित्यस्य प्रयोजनत्वेन वार्तिकक्षतोपन्यस्तम् ।
एव च स्यात् सूत्रे कैय्यटेन शेषोऽयसखीति सूत्रे
दंतेन चैतदुपन्यस्तमिति दिक् ॥

अतो रो—।

यत्तु अल्लुतादिति विशेषणे तु तत्सामर्थ्यात् प
नासिद्ध इति किंचित्। तन्न। यस्मिन् सति यदर्थवत् त
ज्ञाप्यते । यथा सुप्तिङन्तमित्यन्तग्रहणेन संज्ञादि
प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति । प्रकृते तु प्लु
सिद्धत्वेऽप्यप्लुतग्रहणमनर्थकमिति कथं तत्तस्य ज्ञ
कमिति । अत एव चुरादौ यच्यादीनामिदित्करणं चु
दिणिञ्विकल्पज्ञापकमित्युक्तिर्णिञ्विकल्पेऽपीदित्करण
यर्थ्यापरिहारेण तैरेव निराकृतेत्यालोचनीयम्

भोभगो—।

अघि किमु । देवाः सन्तीत्यत्र यत्वस्यासिद्धत्वाद्धि-
नीये सत्यपि तस्य स्थानिवत्वाद्यत्वं मा भूत् । न
ल्विधिः रोरितिसमुदायाश्रयणादिति केचित् ।
सत् । रोरित्यतो र इत्यनुवृत्त्या ल्विधित्वात् । तस्मादु-
चानुवृत्त्यर्थं तदित्यस्मत्कृतप्रदीपोक्त एव निष्कर्षो बो-
: । यदपि यदि तु भोस् भगोस् अघोसिति सान्तं रान्तं
नुकृत्य भो इत्यादीनां त्रयाणामलौन्त्यस्य यः स्यादपूर्वस्य
श्चेति व्याख्यायते तर्ह्यसन्धिन्यायय एव । युक्तञ्चै-
। अन्यथा विभोरिदं सुप्रभगोरिदं रघोरिद-
ल्यचापि यत्वापत्तिः । भवति ह्ययं भोशब्दादिपूर्वो
: । न चाच भोशब्दादेर्लाक्षणिकत्वादग्रहण-
। विभाषा भवन्नगवद्यवतामोश्चावस्येति वार्त्तिकेन
ाप्तानां भवदादिप्रकृतीनां भोशब्दादीनामपि ला-
णिकत्वाविशेषात् । अनर्थकत्वमप्युभयत्र तुल्यम् ।
विशिष्टानामेवार्थवत्त्वादिति । तदपि चिन्त्यम् ।
न्तानुकरणत्वपक्षे भवदादिप्रकृतिकभोशब्दादीनाम-
ग्रहाद्व्याप्तेः । अन्यथा स्वग्रन्थविरोधाच्च । किञ्च
ापातानामभ्युपगमे यत्वविधौ त एव गृह्येरन् प्रति-
ेधोत्तरत्वात् न तु सम्बुध्यन्ता लाक्षणिकत्वादित्याशङ्का

परस्वग्रन्थो विरुध्येत । सान्तानुकरणत्वे सम्बुध्यन्त
लाक्षणिकत्वोक्तेरसङ्गतेः । रान्तानुकरणत्वे निपात
प्रतिपदोक्तत्वोक्तेरसङ्गतेः । भोस् भगोस् अघोः
सान्तनिपाता इति स्वयमुक्तेः । एवञ्च निपातसम्
न्तयोर्लाक्षणिकत्वाविशेषात् ग्रहणे सिद्धे तदर्थं
णप्रतिपदोक्तपरिभाषानाश्रयणमपि तेषां सुधा ।
च प्रभोरित्यादावतिव्याप्तिमाशङ्क्य परस्परस
चर्येण निपातानां वार्तिकोक्तानाञ्च ग्रहणेऽप्यन्येष
ग्रहणादित्युक्तं तदपि विरुध्येत । अर्थवद्ग्रहणपरि
षयाऽतिव्याप्तेः । स्वयं समाहितत्वेन शङ्काया अनु
नात् । साहचर्याश्रयणस्य निष्फलत्वाच्च । साहचर्ये
निपातावयवानां वार्त्तिकोक्तावयवानां च भोशब्दार्द
ग्रहणेऽतिप्रसङ्गासम्भवात्तच्च तदापादनस्यासम्बद्धत्व
त्तेश्च । यद्यपि सान्ता निपाता इत्युपादाय भोभगो इति
निर्दिष्टाश्चादिराकृतिगणत्वात् तच्च बोध्याः । तथा च
भाषा भवदिति वार्त्तिकं नाश्रयणीयम् । अन्यथा पुंस्
वचनमात्रे भो हरे इत्यादिसिद्धावपि भो हरि
भो विष्णवन्द भो गङ्गे इत्यादि न सिध्येत् । एतच्च वृत्ति
रहरदत्तादिमतेनोक्तम् । भाष्यस्वरसरीत्या तु विभ
त्यादिवार्त्तिकमारभ्यमेव । किन्तु निपातोऽपि भोः श
ऽस्ति तेन द्विवचनादौ स्त्रीनपुंसकयोश्च नोक्तदोषः ।

रञ्चैतत्। हे भवन्नितिवत् हे भो इति प्रयोगस्या-
ष्टत्वात् तस्य च वार्त्तिकारम्भ एव सिद्धेः। स्युः पाट्
ाडङ्गं है हे भो इत्यमरोक्तानां तु सम्बोधनार्थानां
पातानां सह प्रयोगायोगात्। किञ्च तत्र भवा-
त्यादिवत् तत्र भो इत्यादापि वार्त्तिके सत्येव सिध्यति।
राभ्योऽपि दृश्यन्त इति सर्वविभक्त्यन्तात् चतसोर्भव-
दिप्रयोग एवेष्टत्वात्। किञ्चामन्त्रितत्वे पदात् पर-
ाष्टमिको निघात आमन्त्रितमित्यविद्यमानवद्भावो
क्यादेरामन्त्रितस्येति द्विर्भावः सुवामन्त्रित इति पर-
मद्भावश्चेत्यादि सिध्यति। भगोऽघो इति निपातावपि
दे प्रामाणिकौ तर्हि स्तां नाम। आमन्त्रितकार्यसिद्धि-
वार्त्तिकायत्तैव। यत्तु वदन्ति। सकारान्तान्नेवैताभ्नि-
तानाख्याय कृत्वोत्वे भाष्ये प्रत्याख्यात इति तदतिरभ-
दिति। अत्रेदं वक्तव्यम्। मतुवसोरिति सूत्रे हि
भाषित्यादि वार्त्तिकं व्याख्याय भाष्यकार आह सम्बु-
वित्युच्यते तत्रेदं न सिध्यति। भो ब्राह्मणा इति
श्रा विभक्तौ लिङ्गविशिष्टाग्रहणं नेतीह न प्राप्नोति।
ब्राह्मणि। नैष दोषः। अव्ययमेष भोःशब्दो नैषा
ातः प्रकृतिः। कथमव्ययत्वं विभक्तिस्वरप्रतिरूपकाश्च
पाताः निपातोऽव्ययमित्यव्ययसंज्ञेति। अत्र कैय-
। विभक्तिस्वरेति केचिदाहुः। भोशब्दस्य विजन्त-

ख्य सौ यद्रूपं रेफान्तं तत्प्रतिरूपको निपातः तस्य रे
यत्वे लोपे च भो ब्राह्मणा इत्यादि सिध्यति । भव
द्भ्यामपि भोः शब्दसिद्धये वार्त्तिकारम्भस्तेनेतराभ्यो
दृश्यन्त इति भवदादियोगे विधीयमानास्तसिला
स्ततो भोस्तत्र भो इत्यत्रापि भवन्ति । एवञ्च भव
द्शब्दप्रकृतिकभोःशब्दप्रतिरूपकत्वमेव निपातत्वमाश्रय
यम् । भवतेर्विजदर्शनादित्यन्य आहुरिति । तन्न । व
कानुयायिद्वितीयमते भवच्छब्दस्यापीत्युतिसन्द
र्विजन्तानुधावनलक्षणाच्चाद्यव्याख्याने वार्त्तिके भवच्छ
प्रत्याख्यात इति प्रतीयते । अस्मिन् पक्षे एषा भोश
ब्दप्रवृत्तिर्भवच्छब्दस्य न किन्त्वव्ययस्यैवेति भाष्याः
प्रयोजनाभावसहकृतलाघवेन भाष्यस्योक्तार्थत्वौचि
दिति भावः । अत एवैतन्मतोपमर्दनाय भाष्यविरं
मनुक्ता चतसिलादिप्रयोजनमेवोक्तं पक्षान्तरे । त
भो ब्राह्मणा इत्यादौ भोःशब्दप्रवृत्तिरित्यादि भाष्या
पक्षद्वयं चेदं वृत्तिपदमञ्जर्योरपि सम्मतम् । एवं च
च्छब्दप्रत्याख्यानाप्रत्याख्यानपक्षयोर्भोष्यादिसकलग्र
सम्मतत्वात् कथं भाष्यस्वरसरीत्या वार्त्तिकमारब्धव्य
त्युक्तम् । कथं वा चादेराकृतिगणत्वात् सान्ता नि
इत्ययुक्तमिति नोक्तं चयाणां निपातत्वस्य तस्याकृति
त्वप्रयोज्यत्वस्य च भाष्यकैय्यटाभ्यामनुक्तत्वात् । भे

तस्य सान्तत्वानुक्तेर्भंगोअघोशब्दयोस्तु सुतराम्। भा-
ादौ हि भोशब्दस्यैव विभक्तिप्रतिरूपकत्वात् निपात-
मुक्तं विभक्त्यन्तं तु द्वितीयपक्षे रेफान्तं न सान्तम्।
त एव भोशब्दस्य विजन्तस्य सौ यद्रूपं रेफान्तं तत्प्र-
रूपको निपात इति कैय्यट आद्यपक्ष उक्तम्। हरद-
न च भोभगोअघो इत्येषां निपातत्वमुक्तं न तु सान्त-
म्। अथ वृत्तिपदमञ्जर्योर्वार्त्तिकप्रत्याख्यानाय चया-
ं तावच्चादेराकृतिगणत्वात् निपातत्वमुक्तम्। भोभगो-
घो पूर्वस्य रोर्यत्वमिति वृत्तिग्रन्थाख्यानुरोधेन सान्त-
त्वानुमीयते। अन्यथा भोशब्दादिपूर्वस्य रोरप्रसिद्धेः।
र्त्तिकाङ्गीकारपक्षे तन्निष्पन्नानामेव यत्वापत्तेश्चेति
ान्तानां चयाणां निपातत्वं स्थितं तदनुरोधेन भाष्य-
प्युपलक्षणादिना तत्परतयैव योज्यमिति मतं तर्हि
त्यैव वार्त्तिकमप्रत्याख्यानतया कथं न भाष्यं योज्यते।
ष्य भाष्यस्वारस्याद्युक्तिविधानाच्च न तत्परता हतैवं
ष्यटोक्तव्याख्ययोर्विभक्तिप्रतिरूपकस्य भोरित्यस्य
क्तान्तनिपातस्य रेफस्य यत्वमिति प्रतीतिस्वारस्यात् भो-
व्दादिपूर्वस्य रोरित्यर्थस्य स्वयमेव प्रागुक्तप्रतिपाद-
ाच्च कथं चयाणां सान्तानां निपातनं युक्तं कथं वा
ष्युक्तार्थनिराकरणावसरे सान्तनिपातानुकरणपक्षः
ायमुक्तः। यदि तु भाष्ये विभक्तिशब्दस्योपादेय-

Acc. No 9522

विभक्तेः पुरस्फूर्तिकतया तदन्तप्रतिरूपकस्य सान्
द्यैव भोशब्दस्य प्रतीतिरत एव कैय्यटेन देः
न्तस्य निपातत्वं मतान्तरेणोपन्यस्तम् । न च भवतेर्
जदर्शनादुपदिष्टविभक्त्यन्तप्रतिरूपकस्य भोशब्दस्यास
दूति वाच्यम् । भवतेर्विजनभिधाने मानाभावात
पस्भोरित्येकदेशानुकरणस्य वा विभक्त्यन्तस्य प्रति
पकसम्भवादिति विभाव्यते तथापि भगोअघोश
योर्भगशब्दस्य चादेराकृतिगणत्वेन चादित्वे भाष्यक
रस्यं स्पष्टमनुक्त्वा प्रत्याख्यानेऽस्पष्टं तत्कथमुच्यत इ
विभाव्यताम् । यत्तु तत्र भो इत्यादापि वार्त्तिके
त्येव सिध्यतीति तत्र भवच्छब्दे सत्येवेत्युचितं त
कैय्यटादावेवोक्तम् । नापूर्वं दृश्यर्थलभ्यं भवदादीन
परिगणितत्वेन निपातप्रयोगेऽपि चतसिलादिसि
प्रकाशे दूषितं च । आमन्त्रितत्वमपि न भवत्प्रयो
नप्रयोजनं निपातभोःशब्दस्य स्वयमेव सम्बोध
र्थत्वोक्तेस्तदुत्तरप्रथमायास्तदर्थकत्वेनामन्त्रितत्वसाम्ब
ज्यात् । सहप्रयोगः परं प्रयोजनमवशिष्यते तदप्यन्ये
त्यादिना द्वितीयपक्षोत्थापनाय प्रकाशे उक्तं नापूर्व
तदपि न वास्तवम् । निपातस्योक्तकोशेन सम्बोधन
त्वेऽपि भवदर्थत्वस्यापि वक्तुं शक्यत्वात् निपातानाम
कार्यित्वदर्शनात् । यद्याऽस्तीति तिङन्तप्रतिरूपकमव

स्तीतिमानित्यादौ धनार्थत्वेऽप्यस्तीत्यादौ तिङन्ता-
त्वमपि दृश्यते । युक्तं चैतत् । कथमन्यथा भो ब्राह्म-
ण इत्यादावनुपपत्तिनिराकरणं नैष दोष इत्यादिना-
व्ययभोःशब्देन भाष्यकृदुक्तं सङ्गच्छते । न ह्यर्थभेदे
ति शब्दमात्रान्यथासिध्या पूर्वपक्षनिराकरणं युज्यते ।
थं वा हे भो इति सहप्रयोग इव भवन् ब्राह्मणेत्यर्थे
ो ब्राह्मणेति प्रयोगः प्रयोजनं नोक्तं परैरपि । एवं च
ासोऽव्ययस्य भवदर्थत्वबोध्ये तेनैव यथोक्तसकललक्ष्य-
सिद्धौ वार्त्तिके भवच्छब्दप्रत्याख्यानं कैश्चिदयुक्तमेवो-
द्भावयितुं भाष्यादौ तु सकारान्तानेवैतान्निपातानाश्रि-
त्य रूत्वौत्वे भाष्ये प्रत्याख्यात इति प्रकाशकृद्भिरुक्तम् । तच्च
भगो अघो इत्येतयोर्निपातयोः प्रामाणिकत्वे तयोरु-
क्तरीत्या भगवदघवदर्थकत्वेन चाशङ्का न चोत्तरम् ।
अप्रामाणिकत्वे तु भाष्ये भवच्छब्दः प्रत्याख्यातो
इत्यादौ तु सर्वमित्यभिप्रायः । अत एवाग्रेदं वाच्य-
मित्यादिना कैयटोक्तान्यमतमुपेक्षितम् । भो इत्या-
दीनां भवदाद्यर्थकत्वाभावाबोधनाय भोः प्रभृतयः स-
म्बोधनार्था आभिमुख्यद्योतका असत्ववचना इतिवन्न
स्थितिस्तत्र हे भो इत्यादिसहप्रयोगो न स्यादिति
प्रकाशस्य उक्तमिति दिक् । यत्तु यत्तु वदन्तीत्यादि

भाष्ये प्रत्याख्यातमित्यन्यमनूदितम् । सोऽयमद्युत्तौ लम्भ द्युति सहृदयैरालोचनीयम् ॥

सौऽचि—।

अत्र सोऽहमाजन्मशुद्धानामित्यादि सिध्यर्थं स त्येव पादश्रुत्पूर्यतेति सावधारणं केचिद्व्याचक्ष्यः साम्ना अरमित्यादौ सुलोपानापत्तिः । तच्च हि अस्मै द्युति छेदः । बह्वल्पग्रहणानुवृत्त्या तदुपपादः सोऽहमाजन्मशुद्धानामित्याद्यव तथोपपाद्यतां किं धारणेनेति ॥

इति स्वादिसन्धिः ।

अर्थवत्—।

अर्थवदिति प्रतिवर्णं वनमित्यादौ प्रातिपदिकज्ञानिष्टत्तये । न चाधातुरिति पर्युदासादर्थवत्त्वस्य असत्वार्थकत्वेनाऽपि पर्युदासोपपत्तेः । न चैवम् द्युति व्यर्थं वक्षे इत्यादौ क्षेप्रत्ययादीनां वारिणी इत्यादीनां च प्रातिपदिकनिष्ठत्त्यर्थत्वात् । न चैषां प्रातिपदिकत्वे किं बाधकमिति वाच्यम् । द्युति प्रातिपदिकत्वे औत्सर्गिकैकवचने तस्याव्य

ुक्यपि प्रत्ययलक्षणेन से इत्यस्य पदत्वेन षत्वनिषेधस्य
ृतीये चौत्सर्गिकैकवचनग्रहणस्य लिङ्गसर्वनाम-
ंसिकत्वे च ह्रस्वस्य प्रसङ्गात्। न चैवमप्यप्रत्यय इति
र्युदासादर्थवत्त्वलाभः। तथाऽप्यसत्वार्थकत्वविशिष्टा-
र्थवत्त्वविशिष्टस्य प्रातिपदिकत्वप्राप्तेः। न च तथा-
र्थवत्त्वलाभवैयर्थ्यम्। पर्युदासार्थकनञसमभिव्याहा-
व्युत्पत्तिसिद्धसादृश्यबोधस्य सामग्रीसत्वेनानिवारणात्।
न चैतावता प्रातिपदिकत्वनिमित्तमर्थवत्त्वम्। तन्नि-
वर्त्त्यस्यानर्थकस्य धातुपर्युदासलभ्यासत्वार्थकत्वेनैव नि-
वर्त्तनात्। तथाप्यप्रत्यय इत्यनुग्रहायाधातुरित्यने-
नार्थवत्त्वमेव सादृश्यं बोध्यतामिति चेन्न औत्स-
र्गिकस्य व्याप्यधर्मरूपसादृश्यबोधस्य त्यागायोगात्।
कथमन्यथौषधेश्च विभक्तावप्रथमायामकर्त्तरि च का-
रके संज्ञायामित्यादौ प्रथमादिपर्युदासेन विभक्त्या-
दिलक्षौविभक्त्यादिग्रहणं नञिवयुक्तन्यायस्यानित्यत्वं
ज्ञापयेत् प्रत्ययत्वादिरूपस्यापि सादृश्यस्य सम्भवात्।
एवं च धातुपर्युदासमात्रेणासत्वार्थकत्वं लभ्यतेति वनादौ
प्रतिवर्णमिव रामादावपि प्रातिपदिकत्वं न स्यादि-
त्यर्थवत्पदोपादानम्। तत्सामर्थ्याच्च नासत्वार्थक-
त्वलाभः। एतेन धात्वादिपर्युदासबलेन यद्यप्यर्थवत्त्वं
लभ्यते तथाप्युत्तरार्थं तदिति केषांचिदुक्तिः परास्ता।

यत्तु पर्युदासो नार्थवत्वं गमयत्यनर्थकस्येङादेर्धातो-र्यावादिकनादेश्च प्रत्ययस्य सत्वादिति हरदत्ततदनु-यायिग्रन्थमंशेनानूद्य धात्वादेरनर्थकत्वे क्रियावाचित्वा-भावे धातुत्वाभावस्य स्वार्थिकानां प्रकृत्यर्थेनार्थवत्त्व-सिद्धान्तभङ्गस्य चापत्तेरिदमयुक्तमिति दूषणं तदेत-दक्षरसप्रवृत्तेन न च ज्ञायते केन धर्मेण सादृश्यमिति हरदत्तादिग्रन्थेनासत्वार्थकत्वरूपेण सादृश्यं स्यादिति तात्पर्यकेण तैरेव निराकृतमित्यनादेयमिति । यद्य-प्रत्यय इति प्रत्ययान्तपर्युदासो न प्रत्ययपर्युदासोऽपि तथापि व्यपदेशिवद्भावेन प्रत्ययान्तत्वादिति हरदत्ताद्यु-क्तौ प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रह-णात् केवलस्य चातथात्वादिति केषांचिद् दूषणम् । तद-पि न । सात्यदाद्योरित्यत्र सातिग्रहणात् प्रत्ययग्रहण इत्यादेस्तद्बहिर्भूतकर्त्तनविषयतायाः प्रकृते कल्पना-दिति दिक् । इदन्त्ववधेयम् । अतः कृकमीत्यत्र कंसग्रहणेन ज्ञापिते उणाद्यव्युत्पत्तिपक्षे ङित्यादीनाम-नेन प्रातिपदिकसंज्ञा विधीयते । व्युत्पत्तिपक्षेऽपि ङित्या-दीनां कृदन्तत्वात् कृत्तद्धितसमासाश्चेत्यनेन प्रातिपदि-कसंज्ञासिद्धावपि बह्वृपटव इत्यादौ प्रातिपदिकसंज्ञा-र्थमिदं सूत्रमावश्यकम् । न च कृत्तद्धितेत्यत्र तद्धित ग्रहणं तद्विशिष्टपरमिति कृत्तद्धितेत्यनेनैवान्नापि सं-

सिद्धौ किमनेन सूत्रेणेति वाच्यम् । तथा विवक्षायां चतुरीत्यादावतिप्रसक्तेः । किं चासत्यस्मिन् सूत्रे उत्तरपदस्य समासग्रहणं विध्यर्थं स्यात्तथा च मूलकेनोपदंशमित्यत्र कृद्ग्रहणे गतिकारकपूर्वस्यापीति परिभाषया कृदन्तत्वात् संज्ञापत्तिः । सति त्वस्मिन्नुत्तरसूत्रस्थसमासग्रहणस्य नियामकत्वेनोदाहृतवाक्यव्याहृत्तिरित्याद्याक्षरसिद्धम् । एवं च पञ्चहयेऽप्यस्य सूत्रस्य आवश्यकत्वेनेदं सूत्रमुणादीनामव्युत्पत्तिपक्षज्ञापकमिति केषांचिदुक्तौ रभसादिति ध्येयम् ॥

कृत्तद्धित—।

यत्तु समासग्रहणं नियमार्थम् । नियमश्च यत्र भज्यते पूर्वो भागः पदमुत्तरञ्च प्रत्ययो न तस्य चेत् समासस्यैवेति तेन बहुव्रीहिशिष्टस्य जन्मवानित्यादेश्च प्रातिपदिकत्वं सिद्ध्यतीति । तन्न । अयमियानित्यादेः समुदायस्य नियमेन प्रातिपदिकत्वावारणात् तत्र पूर्वभागस्य पदत्वेऽप्युत्तरस्य प्रत्ययत्वादिति । यत्र सङ्गा-ते पूर्वो भागः पदमुत्तरञ्च तद्विहितः प्रत्ययो नेति तु वक्तुमुचितम् । वस्तुतस्तु यत्तदर्थयोरननुगमाच्छब्दानुगमस्य चाकिञ्चित्करत्वात्तदननुगमेऽपि न क्षतिरिति ध्येयम् ॥

ङ्याप्प्रातिपदिकात् ।

एतदधिकारफलं सर्वस्य विकारः सार्व डृत्यत्र
दात्तादेश्चेत्यञ् । सति ह्यस्मिन्नधिकारे ऽनुदात्तादे
रिति ङ्याप्प्रातिपदिकविशेषणम् । तत्प्रकृतिकस्यु
क्तात् प्रत्यय इति विधिवाक्यार्थे ऽन्तोदात्तसर्वप्रा
तिकात् सर्वस्येति षष्ठ्यन्तादञ् सिद्धिः । अन्यथ
ह्यनुदात्तादेरिति सुबन्तविशेषणं स्यादिति सर्व
सुपीत्यादुदात्तात् सर्वशब्दात् षष्ठ्यन्तादञ् न स्या
त्याकरः । यत्तन्तरङ्गानपि विधीन् बहिरङ्गो लुग्ब
धत डृत्यादुदात्तप्रवृत्तावेतदधिकाराभावेऽप्यञ् सि
रिति । तन्न । सर्वस्तोम डृत्यत्र लुगादुदात्तयोः
मावेशादविरोधाल्लुगादुदात्तस्यासाधात् । न चार्
रोधेऽप्युदात्तेन लुकः प्रतीक्षणादञः पूर्वमनुदात्त
दित्वं सुबन्तस्याक्षतमेवेति वाच्यम् । समर्थानां
यमाद्देति समर्थग्रहणस्याकृतव्यूहपरिभाषाज्ञापकत्वं
प्रवर्णेनाविरोधे लुकः प्रतीक्षाभावोन्नयनात् । सं
त्यितिरित्यत्र कृतसवर्णदीर्घादिरुस्यात् । न तु
ऽत्यितेत्यकृतसवर्णदीर्घादित्येवमर्थं हि परिनिष्ठि
परं समर्थपदं तत्रातरङ्गत्वादेव सवर्णदीर्घे न्यायसि
किं तदर्थेन समर्थग्रहणेनेत्यकृतव्यूहपरिभाषां ज्ञा

ति । अविरोधेऽपि लुकः प्रतीच्चायान्तु दीर्घेणा-
ाऽनिमित्तप्रातिपदिकत्वनिमित्तस्य लुकः प्रतीच्चणा-
ऽत्यितेत्यवस्थायामिजि सावुत्यितिरिति स्याद्वि-
ान्तरङ्गानपीति परिभाषाबोधनेन समर्थपदसार्थ-
श्चक्रतव्यूहपरिभाषाज्ञापकायोगादिति । किञ्च
ङ्गौहौ प्रकृत्या पूर्वपदमित्यनेन बहुव्रीहिकाले
र्वपदस्वरस्य प्रकृतिभावमात्रं विधीयते तथा चाद्युदा-
ेन लुकः प्रतीच्चायां बहुव्रीहिकाले सर्वशब्दस्यान्तो-
ात्तत्वाद्बहुव्रीहिस्वरेण तस्यैव प्रकृतिभावः स्यान्नत्वा-
ुदात्तस्येति । यद्यपि प्रातिपदिकग्रहणे लिङ्गविशि-
स्यापि ग्रहणात् किं ङ्यादिग्रहणेन तथाऽप्यत्यन्तस्वा-
र्थैकात् परादन्तरङ्गाच्च कनः प्राक् ङ्यापोः प्रह-
र्यं तत् । तेन लोहितार्यशब्दयोर्वर्णादिति ङीभ-
ावयोर्विकल्पेनोदीच्चामातः स्थान इतीत्वविकल्पेन
च लोहिनिका लोहितिका आर्यका आर्यिकेति
सिद्ध्यति । यत्तु सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात्
सुपश्च प्रागन्तरङ्गत्वात् स्त्रीप्रत्यय इति न्यायसिद्धैव
ङ्यापोः प्राक् प्रवृत्तिरिति तन्न । सुबन्तात्तद्धितोत्पत्ति-
रिति सिद्धान्तो हि न्यायमूलकः । तथाहि । सु-
बर्थसंख्यादिसम्बन्धस्तद्धितार्थसम्बन्धापेच्चयाऽन्तरङ्गः ।
लिङ्गसम्बन्ध इव सुबर्थसम्बन्धापेच्चया । तथा च सुब-

पेक्षया स्त्रीप्रत्ययस्यैव तद्धितापेक्षया सुपोऽप्युत्पत्ति प्रागेवेति न्यायः स च नात्यन्तस्वार्थिकेष्विति प्राप्ति पदिकादेव सुबपेक्षया परत्वादन्तरङ्गत्वाच्च तदुत्पत्तौ बाधकाभावात् । तदुक्तं भाष्ये । स्वार्थमभिधाय शब्दो द्रव्यमाह समवेतम् । समवेतस्य च वचने लिङ्ग संख्यां विभक्तिं चाभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानं प्रियकुत्सनादिषु ततः प्रवर्तते सौ विभक्त्यन्त इति । अत एव तरबादेः स्त्रीप्रत्ययापेक्षया बहिरङ्गत्वमुक्त्वा कथं कार्लिकेत्यादिभाष्यप्रत्याख्यात्यन्त स्वार्थिकात् कनः स्त्रीप्रत्ययस्यान्तरङ्गत्वं नास्तीत्यभिप्राय कैयटेन वर्णितः हरदत्तोऽप्येवमिति । न चैवं बह्वृगो मत्केत्यादौ कपः प्राग्युगिल्लक्षणो ङीब् स्यादिति वाच्यम् समासात् प्रागलौकिकवाक्य एवोत्तरपदावयवसमासा नन्तस्य प्रवर्तनात् । स च विभक्तः पुरस्तादिति पक्ष कैश्चिदुपन्यस्तः । स बह्वृधर्मिकेत्यादावापः सुपः परत्व स्यादिति कात् पूर्वस्यात इत्वाभावापत्तेरपेक्ष्यः । तस्मात् परस्तात् पक्ष एव युक्त इति दिक् ॥

सुपः ।

सुपस्त्रीणि त्रीणि पदान्येकैकवचनादिसंज्ञानि स्युरि त्याचार्यः । यत्त्वत्र तान्येकवचनेत्यादि संपूर्णसूत्रमनुवर्त्त

ति। तत्र तानीत्यनुवृत्तौ प्रयोजनं चिन्त्यम्। यद्येकै-
क्ष इत्ययुक्तं शसैव वीप्सायां द्विर्वचनायोगा-
त्। येननाप्राप्तिन्यायेन द्विर्वचनापवादः शसिति सि-
द्धान्तादिति। तदपि न। एकां कपिलामेकैकशः
पहरेत्यत्वो दत्वेति भाष्याच्छसन्तस्य प्रत्येकमित्य-
र्थकत्वेन कैयटेन व्याख्यानाच्च स्वार्थिकस्यापि शसो
ज्ञापनात्। एतेन सर्वस्य हे इत्यत्रैकैकशो दद्या-
नीति भाष्यप्रयोगात्तान्येकेति सूत्रकारनिर्देशाच्चोभयं
साध्विति प्रकाशो व्याख्यातः। निरस्तश्चोदाहृतभा-
ष्यस्यान्यविषयत्वादित्यादिलेखः। तत्सूत्रस्थैकैकशो द-
दातीति भाष्यं केचिदाङ्ङरत्यार्थोऽप्येकशब्दोऽस्ति तस्य
वीप्सायां द्विर्वचने बहुल्यार्थादिति शसित्यस्यान्यम-
तत्वेन व्याकुर्वतः कैयटस्य तत्राप्येवमेव व्याख्यानमभि-
प्रेतमिति लक्षितत्वात्। अन्यत्रावश्यके तथा व्याख्याने
क्लिष्टव्याख्यानस्यायाचान्याय्यत्वात्। माधवादीनामत्रैवा-
नुकूलत्वाच्चेति॥

सरूपाणाम्-।

राम राम औ इति स्थित इति प्रक्रियाकौमुद्या
अवयववत्समुदायस्य मिलितेनार्थवत्वेन प्रातिपदिक-
त्वादिकाच्च द्विर्वचनन्यायेन समुदायाद्विभक्तिरिति तन्नि-

मित्त एकशेष इति भावः । यत्त्वस्मिन् पक्षे माढमात्रा वित्यत्रैकशेषः स्यादिति तन्न । एकविभक्तावित्यस्य इत्या सारूप्यविशेषणत्वात् । न चैवमपि तृतीयादावे विभक्तौ सारूप्यात्तद्दोषतादवस्थ्यम् । प्रत्यासत्याऽनन्यैकग्रहणेन चैकशेषनिमित्तसारूप्यविशेषण्योर्वि त्तयोरेकत्वप्रतीतिः । तथा च यस्यां विभक्तौ सरूपा तस्यामेकशेष इत्यर्थलाभात् प्रथमाद्विवचनादावरूपान्न तन्नोक्तदोषः । नन्वेकविभक्ताविति सा प्यविशेषणमेवास्तु उत्तरसूत्रादेवकारमपकृष्यैकविभ यानि सरूपाण्येवेति व्याख्यानेन तृतीयादौ सारूप्ये नोक्तमाढशब्दयोरतिप्रसङ्ग इति किमाढस्यैकशेष शेषणत्वेनेति चेन्न । प्रातिपदिकानामेकशेषे म मात्रोः प्रतिषेधः सरूपत्वादिति वार्त्तिके विभक्त्यन्ता मप्येकशेषेऽयं दोषः कुतो न स्यात् । माढभ्यामित्य त्रिभक्त्यन्तानामपि सारूप्यादित्याशङ्क्य विभक्त्य न्त सरूपाणां भवितव्यमेवैकशेषेणेति प्रातिपदिकानामे कशेषे दोषो भवतीत्युक्तरीतेन भाष्यकृता व्याख्या स्वीकृतस्योक्तमाढशब्दयोरेकशेषस्य त्वद्व्याख्यानेऽ ष्टेः । प्रथमाद्विवचनादौ वैरूप्येणैवकारार्थाभावात न च माढभिरित्यादावुक्तमाढशब्दयोरेकशेषस्वी रेऽनुप्रयोगविप्रतिषेधः । तैरित्युक्ते ह्यर्थस्य ताभि

पुमर्थस्यानवगमादिति वाच्यम्। शिष्टसमानलि-
ानुप्रयोगस्य लुप्तशब्दार्थावगमकत्वस्वीकारात्। अ-
न्यथा ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ तावि-
ब्राह्मणाः शुक्लश्च शुक्ला च शुक्लश्च शु-
नि तानीत्यत्र स्त्रीपुंसयोरवगम इत्यस्मदुक्तमेव
व्यानमादरणीयम्। यच्चोभयविशेषणत्वे भिक्षाणां
ह्यौ नैवमिति न सिद्ध्येत्। तथाहि। भिक्षा ३
ा अ इति स्थितेऽन्तरङ्गानपीति लुकि कृते विभक्ति-
त्वाभावादेकशेषो न स्यात्। लुका लुप्ते प्रत्ययलक्ष-
णावात्। किञ्च। रामावित्यादौ परत्वान्नित्यत्वाच्च
ावेकादेशे कृते विभक्तिपरत्वाभावेनैकशेषो न
दुभयत आश्रयणेऽन्तादिवद्भावाभावादिति। तदपि
। अनेकबोधकादेकस्माद्भिक्षाशब्दादिभक्त्यन्तादपि
ामिति सिद्धः। एकस्मादनेकबोधे किमेकशेषेणेति
। एकनैवानेके बोधनीया इति नियमाभावादेकैका-
प्रायेण घटोऽयं घटोऽयमितिप्रयोगवदनेकबोधनाय
घटावित्यादेरप्यापत्तिस्तन्निवृत्तिः। न चैवमप्येक-
ेषयादनेकस्माद्भिक्षावण्यनिष्टमप्यापद्येतेति। न
ाभिधानादन्यविवक्षायामेतद्विषयेऽणाद्यनुत्पत्तेः स्वी-
रात्। अनभिधाने चोक्तानन्यगतेरेव बीजत्वात्।
ादेशस्याचः परस्थिन्निति स्थानिवत्वेन विभक्ति-

परत्वात् प्रातिपदिकानां विज्ञेत्यादिदोषस्याप्यसम्भवात् । एकशेषो ह्यितरनिवृत्तिपूर्वकमवस्थानस्य सिद्धत्वादितरनिवृत्तेर्विधेयत्वा देकशेषविधेः पूर्वविधित्वान्न बाधित् क्षुद्रोपद्रवः । यत्तु यद्यपि व्याचख्युरित्यादिना व्यक्तिपक्ष यावद्व क्ति तत्तच्छब्दप्रयोगे प्राप्ते एकस्यैव प्रयोगो यथा स्यादिति सूत्रम् । आकृति पक्षे त्वेकेनैवाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमिति प्रकाशैक देशमनूद्य व्यक्तिपक्षेऽपि न ब्राह्मणां हन्यादित्यत्र ब्राह्मणशब्देनैकेनाऽप्यनेकस्य तन्त्रेण सुवचत्वादन्यथा जातिपक्षेऽपि वाक्येन सम्यक्समयोरित्यादिनार्थानुरोधेनानिर्वाहादित्युक्तम् । तदप्येतत्समाधानाय प्रवृत्तेन शिष्टं भाष्यादितो ऽवगन्तव्यमित्युत्तरप्रकाशग्रन्थेन समाहितमिति भाष्यादालोचकैरालोचनीयम् । यच्च राम राम औ इति स्थित इत्यलौकिकमेतत्प्रक्रियावाक्यमूह्यते न तु लौकिकम् । अलौकिके च विभक्त्येकादेशादि न प्रवर्तते प्रयुक्तानामेवान्वाख्यानादिति प्रकाशोक्ते प्रयुक्तानेव ह्यन्वाख्यातुमलौकिकमुत्सृज्यते शास्त्रीयकार्यन्तु पूर्वमलौकिक एव प्रवर्तत इति दूषणम् । तदप्यलौकिकशब्दस्य कथञ्चिदेकशेषार्थबोधकासाधुशब्दार्थकस्य तात्पर्यानालोचनेन । अत एव हस्तचेष्टादिस्थानीय इत्यलौकिकवाक्यविशेषणं प्रकाशे उक्तमिति दिक् ॥

अतोऽभिसः—।

एवेत्र तु न कृतः । बज्झलं छन्दसीत्यत्रानतोपि भवति नद्यैरिति काशिकोदाहरणस्यैसं विनानुपपत्तेः । परूपनिवृत्तिस्त्वैसं विनाप्येकारोच्चारणसामर्थ्यात् सिद्धा । अन्यथाऽनेकाल्त्वात् सर्वादेशमिसमादेः परस्येत्यादादेशमतं वा विदध्यात् । निर्जरसैरित्यादावैकारस्यवणमैसः फलमिति प्राञ्चोक्तायस्तु वृत्तिकदुक्तमन्तरानुसारिणा इत्यवधेयम् ॥

बहुवचने—।

अच झलि किम् । दृक्षाणामिति वृत्तिस्तत्र हरदत्तः। अग्नीनामित्यादौ सावकाशं नामि दीर्घं बाधित्वेदमेत्वमकारान्तेषु स्यादिति भाव इति । यद्यपीदन्तादिषु सावकाशं नुटमकारान्तेषु परत्वान्नित्यत्वाच्चैत्वेन बाध्येतेति नामीति प्राप्तिरेव दुर्लभा तथाप्युतो वृद्धिर्लुकि हलीत्यतो हलीत्यनुवृत्तौ झलग्रहणमनर्थकमिति प्रश्नवृत्त्याशयः । अत एव दृक्षा इत्यादि न प्रत्युदाहृतम् । तथा च नुटं विनैत्वाप्राप्तेर्नुटि च सति नामीति प्राप्तिरिति वृत्त्याशयानुसारेण हरदत्तग्रन्थः सङ्गमनीयः । तत्र यदि हलीत्यनुवृत्तौ नुटि च सति

सन्निपातपरिभाषयैव नैत्वमिति किं झल्ग्रहणेनेति विभाव्यते तदा झल्ग्रहणं च्विल्यप्रयोजनमिति ध्येयम् ॥

नामि—।

रामाणामित्यादौ सुपि चेति दीर्घः सन्निपातपरिभाषया न भवति भवति चायमारम्भसामर्थ्यादिति केचित्। तन्न। कतीनामित्यत्र परत्वात् षट्चतुर्भ्यश्चेति नुटि सन्निपातपरिभाषाऽविषये नामीति प्रवृत्तेरारम्भसामर्थ्याभावात्। नैकमुदाहरणं योगारम्भं प्रयोजयतीति हि लाघवमूलकं प्रकृते च नामीत्यतो लघोः प्रकारस्याभावात्। नन्वामीत्यत्र वाच्ये नुडुपादानं ह्रस्वाश्रये नुटि सति दीर्घो यथा स्यान्नुटः पूर्वं मा भूदिति तच्च कतीनामित्यत्रैव दीर्घे सत्यनुपपन्नमिति रामाणामित्यादावप्यनेन नुडुपादानसामर्थ्याद्दीर्घं एष्टव्य इति सन्निपातपरिभाषायाः प्रकृतेऽप्रवृत्तिः। न चामीति श्रुतेर्नित्यत्वाद्दीर्घे सति रामाणामित्यादौ ह्रस्वाश्रयो नुरान प्रवर्त्तेत नृणां तिसृणां चतसृणामित्यत्र ह्रस्वाश्रयस्य नुटः सावकाशत्वेन भूतपूर्वत्वाश्रयणायोगादिति वाच्यं नुटि सत्येव दीर्घ इत्येतदर्थत्वं नुडुपादानस्येति वाच्यम्। नृनद्यापइत्येव सिद्धे ह्रस्वग्रहणेन भूतपूर्वत्वाश्रयावश्यकत्वात्। तिसृणामित्यत्र नेरित्यनुवृत्त्या चत-

णामित्यत्र षट्चतुर्भ्यश्चेति नुटः सिद्धत्वादिति चेत् ।
। एवं सति रामाणामित्यादौ नुडुपादानप्रयोजनस्या-
ोर्त्यत्र सिद्धत्वान्नुडुपादानवैय्यर्थ्येन सन्निपातपरिभा-
ाप्रवृत्तेरेवाभावात् । न च प्रियचतस्रृणामित्यत्र षट्-
तुर्भ्यश्चेति नुटो गौणत्वादभावानुडर्थं ह्रस्वग्रहणमिति
भूतपूर्वत्वाश्रयणे मानाभावादुक्तरीत्या नुडुपादानमा-
श्रयकमिति वाच्यम् । एवं सति नुडुपादानस्य
सन्निपातपरिभाषाविषये दीर्घप्रवर्तकत्वासमर्थनात् ।
ोपधाया ह्रित्यत्रानुवृत्तये नामीत्यस्यावश्यकत्वाच्च ।
न हि तत्रामीत्यनुवृत्त्या सिद्धिः । चर्मणामित्यादाव-
तिव्याप्तिरिति । तस्मात् सन्निपातपरिभाषाऽनित्यत्वा-
श्रयणे समाने उदाहृतमपि चेत्यनेनैव दीर्घसिद्धौ रा-
मशब्दे नामीत्युपन्यासः प्रामादिक इति प्रकाशोक्तं सा-
ध्वेव । न तिस्रृचतस्रिति निषेधबलादिह सन्निपातप-
रिभाषा न प्रवर्तत इति च वक्तुमुचितमिति दिक् ॥

आदेश-।

अचादेशरूपः सकारो गृह्यते न त्वादेशावयवः
शासिवसिघसीनां चेति सूत्रे घसिग्रहणात् ज्ञाप-
कात् । अन्यथा तत्रेणकोरित्यनुवृत्त्या घसेर्जक्षतुरित्या-
दावदादेशघसेरेवोदाहरणं तत्र चादेशावयवत्वेन पूर्व-

ह्वेणैव षत्वसिद्धेर्घसिग्रहणमनर्थकं स्यादित्याकरः । अचेदं तत्त्वम् । अदादेर्घञ्सेरेवेति क्रुतो भ्वादिपठितस्य प्रकृत्यन्तरस्यापि सम्भवात् तदर्थं च घसिग्रहणं स्यादिति कथं ज्ञापकमिति यद्यपि तथापि लिख्यन्यतरस्यामित्यदो घस्विकल्पविधानात् प्रकृत्यन्तरस्य न सर्वत्र प्रयोग इति ज्ञाप्यते । अन्यथा धातुद्वयेन लिटि आद जघासेत्यादिरूपसिद्धौ लिख्यन्यतरस्यामित्यनर्थकं स्यादिति प्रकृत्यन्तरस्य षत्वविषयेऽप्रयोगाददादेश्चस्यैव घसेर्ग्रहणमिति । ननु प्रकृत्यन्तरस्य क्वचिदप्रयोगो ज्ञाप्यते न तु सर्वत्र प्रकृत्यन्तरोपदेशवैयर्थ्यापातात् तथा च कथं षत्वविषये सर्वत्र तस्याप्रयोगनिर्णय इति चेत् । न । ज्ञापकोपदेशाभ्यां क्वाचित्कौ प्रयोगाप्रयोगौ प्राप्तौ तत्र क्व प्रयोगः क्व नेत्यत्र नियामकाकाङ्क्षायां लृदित्त्वादिकं लुङादौ प्रयोगनियामकं कल्प्यते तथा च षत्वविषये सर्वत्र तस्याप्रयोगनिर्णय इति चेत् । न ज्ञापकोपदेशाभ्यां येमानाभावात्तस्याप्रयोगात् । न चैवमपि प्रकृत्यन्तरस्यानुदात्तोपदेशपाठाद्वलादावार्धधातुके प्रयोगकल्पनाज्जक्षिवेत्यादौ षत्वविषयेऽपि प्रयोगात्तदर्थं घसिग्रहणं कथं ज्ञापकमिति वाच्यम् । लिख्यन्यतरस्यामिति हि लिण्मात्रे प्रकृत्यन्तरस्याप्रयोगं न ज्ञापयति वैयर्थ्यादिति लिटि तदतिरिक्ते च

क्वचित् । न तु क्वचिदेवाप्रयोगं तथा सति लिटि प्रयोगसंभावनायां लिव्यन्यतरस्यामिति सूत्रस्य वैयर्थ्यानुद्धारादुक्तज्ञापनासम्भवात् । एवं चासंजातविरोधित्वाल्लिट्सामान्येऽप्रयोगस्य ज्ञापितत्वाज्जघिवेत्यादौ न तत्प्रयोगः । अनुदात्तोपदेशपाठस्तु तास्यादौ तत्प्रयोगेऽप्युपपन्नो लिटि वमयोर्न तत्प्रयोगं कल्पयति उक्तज्ञाप्यविरोधात् । उक्तज्ञापकेनोपदेशेन च क्वाचित्कप्रयोगाप्रयोगप्राप्तौ नियामकाकाङ्क्षायामनुदात्तोपदेशपाठो वलाद्यार्द्धधातुके प्रयोगमनुमापयति तत्र लिट्सामान्येऽप्रयोगस्य प्राक्कल्पनात्तद्विरोधाल्लिडतिरिक्ते वलादाविति कल्प्यते उक्तज्ञाप्यानुपस्थितौ च नियामकाकाङ्क्षाभावादनुदात्तोपदेशपाठादेवोक्तनियामकत्वाभावादिति । अत्र सस्य सोष्मणोऽघोषस्य तादृश एव ष इति प्रकाशः । तत्र सोष्मण इत्यस्योष्मत्वाश्रयस्योष्मण इत्यर्थः । न तु वर्गेवर्गे च प्रथमावघोषौ युग्मौ सोष्माणाविति प्रातिशाख्योक्तस्य सोष्मणः । अनेन विवृत्तमूष्मणां स्वराणां चेति वचनोक्तं विवृतत्वं सूच्यते । तावन्मात्रं च ठकारेऽतिप्रसक्तमिति तद्व्यावृत्तयेऽघोषस्येतीति भावः । एतेन ठकारेऽतिप्रसङ्गादिदं न्यूनमिति केषाञ्चिदुक्तिः परास्ता ।

आमि सर्वनाम्नः-।

यत्त्ववर्णान्तात् सर्वनाम्नो विहितस्याम इति । तन्न ।

तेषामित्यादावव्याप्तेः। अत एव ह्रस्वाभ्य इति ह्रस्वाभ्यो विहितमित्यर्थे या सेत्यादावव्याप्तिर्भवति ह्रुता। न च परश्चेत्यर्थे दक्षिणोत्तरपूर्वाणामित्यत्रा प्राप्तिः द्वन्द्वे चेति निषेधः समुदायस्य न त्ववयवानाम् त्यामः सर्वनामपूर्वशब्दात् परत्वादिति सर्वनाम्नः स्मै तस्यावर्णान्तात् परश्चेति व्याख्यानान्नातिप्रसक्तिर्न वा सक्तिरिति वाच्यम्। तथा सत्यादित्यनुवृत्तस्य सर्व मविशेषणत्वाभावेनावर्णान्तादिति व्याख्यानस्या त्वात्। अङ्गविशेषणत्वाभिप्रायेण तथा व्याख्याने विशेषणत्वे प्रयोजनाभावात्। किञ्च। द्वन्द्वे चेति धो नावयवानामिति कुतः प्रयोजनाभावादिति दक्षिणोत्तरपूर्वाणामित्यादौ तदन्तविधिनाङ्गाधि तस्य च तदुत्तरपदस्य चेति वा प्राप्तसुडादिनिषे प्रयोजनत्वात्। न च परमसर्वश्चेत्यादौ चतसिल सिध्यर्थं सर्वनामसंज्ञायां तदन्तविधेरावश्यकत्वाद् दाहरणे समुदायस्य सर्वनामत्वात् सुडादि दु मिति द्वन्द्वस्य संज्ञानिषेधावश्यकत्वेनावयवानां त षेधो वाक्यभेदापत्तेरिति वाच्यम्। चत्वादि प्रातिपदिकादित्यनुवृत्तः सर्वनाम्ना तद्विशेषणो न्तविधिनैव चत्वादेः सिद्धे सर्वनामसंज्ञायां त विधानावश्यकत्वात्। विशेषणविशेष्यभावे का

ङेर्णेष्टसिद्धौ समासप्रत्ययविधौ प्रतिषेध इति लक्ष्य-
नुरोधिविशेषणविशेष्यभावव्यत्यासतात्पर्यकम्। अत एवो-
जःसहोऽम्भस्तमस इति सूत्रे उत्तरपदाक्षिप्तेन पूर्वपदेन
ओजःप्रभृतीनां विशेषणात् सततनैशतमोहृत्तमित्यत्र त-
मोलक्षे पूर्वपदत्वेऽपि तमसः पूर्वपदत्वाभावात्ततीयाया
अलुङ्नेति हरदत्तेनोक्तम्। अत एव सर्वादिसूत्रे उप-
सर्जनप्रतिषेधप्रत्याख्यानमुपक्रम्य भाष्ये ऽथवाङ्गाधि-
कारे यदुच्यते इति प्रघट्टकेन सर्वनाम्नः स्मायित्यादेः
सर्वनामार्थगतसंख्याद्यभिधायिनो ङेः स्मायित्यादि-
कमर्थमङ्गीकृत्य परमसर्वस्मायीत्यादिसंग्रहोऽतिसर्वाये-
त्यादावतिप्रसङ्गवारणं च कृतं तद्धि सर्वनामसंज्ञायां
तदन्तविधौ सति न घटते। उपसर्जनप्रतिषेधाभावे
ऽतिसर्वशब्दस्य सर्वाद्यन्तत्वेन सर्वनामत्वात्। ङेश्च तद-
र्थगतसंख्याभिधायकत्वादतिसर्वायेत्यादावतिप्रसङ्गानु-
द्धारादिति। यत्तु सर्वाद्यः पञ्चत्रिंशदिति प्रतीकमु-
पादाय पञ्च च त्रिंशच्चेति द्वन्द्वः पञ्चाधिकास्त्रिंशदिति
तत्पुरुषो वा। यत्तु प्रत्याहारा एकचत्वारिंशदिति
प्राचो ग्रन्थं व्याचक्षाणैरुक्तं नायं मध्यमपदलोपी तत्पु-
रुषः। तथा सति राजन्यबन्धुवचनद्वन्द्वेत्यकटषिणषु
संख्येति विधीयमानः पूर्वपदप्रकृतिस्वरो न स्यात्।
तस्मात् समाहार द्वन्द्व एवायम्। एकविंशतिरित्यादौ

तु नपुंसकत्वं न भवति लोकाश्रयत्वाल्लिङ्गस्येति । च्चिन्त्यम् । समासभेदस्येष्टापत्तेरिति तन्न नायं म मपदलोपी तत्पुरुष इत्यनुक्तोपालम्भः । तेषां व्याख्य हि द्वन्द्वदूषणपूर्वकमध्यमपदलोपिसमासवादमनूद्य दूषणाय राजन्येत्यादिना विधीयमानः पूर्वपद्र तिस्वरो न स्यादित्युक्ता तस्मात् समाहारद्वन्द्व एव मित्युक्तं तस्य च पूर्वपक्षिकृतं द्वन्द्वदूषणाभावे ता न तु मध्यमपदलोपितत्पुरुषाभावे तथा सत्येव त दिति हेतुसङ्गतेः । एवकारेण चेतरेतरयोगे व्यव दः । अत एव पूर्वपक्ष्युद्भावितेतरेतरयोगदूषणं हि नापादनरूपमपरिहृत्य समाहारदूषणमेकविंशति त्यादौ नपुंसकत्वापत्तिरूपमेव परिहृतं लोकाश्रय लिङ्गस्येतीति नोक्तदोषः । किञ्च भाष्यादिपर्यालो नया समाहारद्वन्द्व एवायं न मध्यमपदलोपी स द्भूति लक्ष्यते तथाहि चार्थे द्वन्द्व इति सूत्रे शेषे ए दीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रस सिद्धं त्वधिकान्ता संख्या संख्यया समानाधिकरणा कारेऽधिकलोपश्चेति वार्त्तिकोक्तो स्वरो न सिध्यती दूषणमुक्ताऽस्तु तर्हि द्वन्द्व इत्यादिना समाहारद्वन्द्वं व कृत्य तद्दूषणं नपुंसकापादनं लिङ्गमाश्रित्यमिति प्याकारः परिजहार । हरदत्तोऽपि द्वन्द्वदूषणापूर्वकं

।पदलोपिसमासमाश्रङ्क्य स्वरासिद्धया दूषयित्वा
।द्व द्वन्द्व एवायमिति सावधारणमभिदधौ बहु-
हौ संख्येय इति सूत्रे संख्यायास्तत्पुरुषस्यो-
ख्यानं निस्त्रिंशादर्थमन्यत्राधिकलोपादिति वा-
काव्याख्याने एकाधिका विंशतिरेकविंशतिरि-
भाष्यं वार्त्तिककृदभिमतमध्यमपदलोपिसमा-
'भप्रायेण एवं च यथोत्तरं मुनीनां प्रामाण्या-
यकाराभिमतः समाहारद्वन्द्व एव साधुरिति स-
'भर्भाव्यम्। उभशब्दस्य सर्वादिषु पाठो ऽनर्थकः
ाजनाभावादित्याकरः। केचित्त्वकजर्थं उभशब्दस्य
ः। न च कप्रत्ययेनेष्टसिद्धिः। उभयत उभयचे-
दाविवायच्चप्रसङ्गात् तदुक्तमुभयोऽन्यचेति। अन्यच
ाचनपरत्वाभावे क्रुत्याङ्गः। अचेदमवधेयम्। उभयो-
त्रेति न विधिः किन्तूभादुदात्तो नित्यमित्यत्रोभश-
ाद् वृत्तिविषये नित्यमयच् स्वार्थं इत्यर्थको नित्यमि-
योगो विभज्यते। तत्सिद्धार्थानुवादः। तथा चाक-
त्तावप्ययच् दुर्वारः। न चोभौ साभ्यासस्येति निर्दे-
श् वृत्तिविषयाद्वृत्तिविषयसाधारण्येन यत्रोभयशब्दा-
न्नं द्विवचनं लुकानापद्यते ततोऽन्यत्र स्वार्थिकोऽय-
ति शापनान्नाकञ्विषयेऽतिप्रसङ्ग इति वाच्यम्।
चो द्विवचनविषय इव कविषयेऽप्युभकाविति भा-

ष्यप्रयोगेणासङ्कोचात् । उभयकाविति भाष्यप्रयो
ऽकचो न तु कस्येति न सङ्कोच इति चेत् न । ए
काविति प्रयोगो भाष्यकृत्सम्मत इति तावन्निर्वि
दम् । तथा चोभकाविति प्रयोगस्य काविषयत्वे ए
शब्दस्य सर्वादिषु गौरवादपठितत्वेन तस्य काविषय
ष्वेव कल्पनात् । न च के सति अन्याभावो द्विव
टाब्विषयत्वादिति वार्त्तिकमसङ्गतम् । काविषये उ
द्विवचननियमाभावादिति वाच्यम् । एतस्याप्युभशब्द
सर्वनामत्वेऽकजेव प्रयोजनमित्यत्र हेतुभूतस्मायाद्यभ
हेतुत्वेनोक्त्वादुक्तयोगविभागसिद्धैकदेशानुवादत्वा
यद्वा उभशब्दार्थगतसंख्याबोधकद्विवचनविषयत्वादि
तदर्थं इति काविषयेऽप्ययचः सङ्कोचादिति । एवं
भाष्यकृतस्य सर्वादिषूभशब्दप्रत्याख्यानस्योक्तरीत्या
मञ्जस्यं तत्प्रौढिवादत्वोक्तिरेव प्रौढिवाद इति
व्यम् ॥

न बहुव्रीहौ ॥

यत्तु व्याख्यातृवचनदूषणं त्वं पिता यस्येत्या
दिबहुव्रीहौ प्राप्ता सर्वनामसंज्ञा निषिध्यत इति
लौकिकवाक्ये नायं निषिधः । किंत्वलौकिक इत्या
दिसिद्धः । तस्य च युष्मद् सु पिद् सु इत्याकारकर

पतेत्याद्याकारकत्वायोगादिति तन्न । त्वं पितेत्तत्समानार्थकविग्रहवाक्य इत्यर्थकत्वेन दोषात् । अत एव यद्वाक्योपमर्दैनायं बहुव्रीहिः ो तस्मिन् बहुव्रीहिप्रकृताविति विग्रहवाक्यविव्याख्यातभिक्षापात्तं भवताऽप्यत्रैव सूत्रे ऽलौकिकये संज्ञानिषेधफलकथनावसरे ऽलौकिकवाक्ये प्रवर्तत स च समासेऽपि श्रूयेत अतिक्रान्तो त्वमतिभवक्रान्तिरिति वाक्ये प्रकृतो ऽक्रजतिभवति समासे श्रूयते । तथा प्रकृते ऽलौकिकवाक्ये ो ऽक्रच् समासेऽपि श्रूयेतेति । तस्य चोक्तार्थकत्वं ऽनुपपत्तिरिति । यच्च यद्पि व्याचख्युः । नन्वतिौ संज्ञा न प्रवर्त्तते त्वक्तिपटकादौ तु प्रवर्तते । किं विनिगमकम् । तत्राह अनङ्कार्यत्वेनेति । ाढ्यः समुदायपरः तेनातिसर्व इत्यंशस्य संज्ञा ाता सर्वनाम्नोऽङ्गात् स्माया दिविधानात् । अवाच्यस्य सत्यपि सर्वनामत्वे दोषाभावात् । समुदायि समुदायार्थं प्रति सर्वादेरुपसर्जनत्वात्तदन्तस्य न भवतीति युक्तमिह त्ववयवमात्रस्य सा चिंता न समुदायस्य । अवयवश्च स्वार्थमात्रप्रधान इति प्रसङ्ग इति वैषम्यमस्तीत्याशय इति तदपि न । अ-

ङ्गाधिकारे तदन्तविधेः सर्वसंमतत्वेनावयवमात्रे सत्य
सर्वनामत्वे दोषो नास्तीत्युक्तेर्व्याहतत्वात् । अङ्गाधि
रपरिभाषया सौ स्यादिति स्वग्रन्थविरोधाच्चेति तद
धानात् । तथाहि । व्याख्यातृभिर्हि प्रकृतसूत्रेण बहुव्री
तदवयवेषु वा संज्ञा निषिध्यत इति व्याख्यातिस
येत्यादौ संज्ञानिषेधार्थमुपसर्जनानां सर्वादित्वनिरा
वश्यकत्वेन प्रकृतसूत्रमनर्थकमित्याशङ्क्य सूत्रे तात्पर्य
र्यान्वर्थसंज्ञायाः सूत्रकारेण स्वीकारादुपसर्जननि
सावश्यकत्वेन प्रकृतसूत्रानर्थक्यं तदवश्यमित्याशङ्क्य
त्कपिटक इत्यवतार्य प्राचोक्तं तदर्थं निराकृत्य तद्
देवं व्याख्येयमित्यादिना बहुव्रीहिप्रकृतिभूतात्
किकवाक्येऽयं निषिध इति व्याख्याय तच्च नञ्चित्या
नातिसर्वादितत्पुरुषवत्कपिटकादिबहुव्रीहिसमास
कृतिवाक्यावयवानां सर्वनामत्वाय इत्तिप्रवृत्त्योः किं
निगमकं येनास्तीत्युक्तं तत्राङ्गाधिकारे तदन्तेऽनि
उत्तरभानिषेध इति युज्यतेत्याशङ्क्यानाङ्गकार्यत्वेने
तात्पर्यं तत्पुरुषवाक्यगतसर्वादित्वमभिप्रेत्यावयवमात्रे
त्यपि सर्वनामत्वं दोषो नास्तीत्युक्तं तत्राङ्गाधिकारे त
न्नञ्विधिसङ्गावेपि व्याघाताभावस्य स्पष्टत्वात् । अङ्गस्य
मासस्य सर्वनामत्वाभावात् । अङ्गाधिकारपरिभाषयै
तदन्यस्य बहुव्रीह्यन्तःपातिनामपि सर्वादीनां

संज्ञानिष्टत्तये सूत्रमिदमिति वदतां प्राचां मतं
नुमतिसर्वायेत्यादावतिप्रसङ्गदानाय प्रवृत्तोऽङ्गस्य
मान्तत्वात् समञ्जस एवेति तन्निरोधस्यापाद्यभावा-
। यद्यपि यद्यपि सूत्रवार्तिककृतोरप्ये न्मतं त-
न्यासकृता विवृतत्वान्न्यासकृन्मतमित्युक्तमिति
यं वार्तिककृताऽस्यार्थस्यास्पष्टत्वान्न्यासकृता स-
कृते सतीत्यादि वदतोक्तार्थस्यादूरत्वक्त-
तद्विवृतत्वाभावाच्चेति तदपि मन्दम् । वार्ति-
ऽप्यस्यार्थस्याप्रतिषिद्धत्वेनानुमतत्वात् । गौन-
त्वाच्चेति तुशब्देन प्रागुदाहृतवाक्यावयवसर्वना-
मधेयस्य सूत्रवार्तिकाद्यनुमतेः स्पष्टत्वाच्च । न्या-
ान्तर्गतसमासपदस्य तत्प्रकृतिवाक्यार्थकत्वेन व्या-
भिव्यक्तत्वेनोक्तार्थस्य तद्विवृतत्वसम्भवाच्च। यच्च
ग्रन्थश्चुच्छुदः सूत्रकारकापर इत्यत्र सूचकारमत
र्वग्रन्थविरोधोद्भावनं तदपि पूर्वग्रन्थास्वरसप्रकृत-
। दोषावहतम्। एवञ्चायं प्राचः प्रक्रियाग्रन्थस्तद्व्या-
ग्रन्थाश्चापातरमणीया एवेत्यपातरमणीया इति
। साधूक्तमिति युक्तमुत्पश्यामः ॥

तृतीयासमासे ।

तृतीयासमासप्रतीकमुपादायेह पूर्वसदृशेति विग्रहि-

तः समासो गृह्यते प्रतिपदोक्तत्वान्न तु कर्तृकरणे कृते तेन त्वयका कृतमित्यत्र निषेधो नेत्युक्तम्। तदनध्यानात्। तथाहि। तृतीयासमासार्थेत्यादि विभक्तिकसमास इत्यतः समासग्रहणमनुवर्तमाने पुनः समासग्रहणाल्लभ्यते। तत्र वाक्यं लौकिकमलौकिकनिषेधवैयर्थ्यात्। तच्च प्रतिपदोक्तसमासग्रहे सति सम्भवति। अन्यथा न त्वत्कृतमित्यादि कर्तृकरणतृतीयासमासप्रकृतिभूतालौकिकवाक्ये ऽकृजभावार्थं ज्ञानिषेधसम्भवात्। एवञ्च यावत्प्रतिपदोक्तसमासग्रहणं न सिद्धं तावदलौकिकवाक्यस्यैव तादर्थ्याद्गृहणं स्यादिति त्वयका कृतमिति लौकिकवाक्योदाहरनुपपन्नमिति। न च तृतीयासमास इति सर्वनात्वविधातस्य भावित्वादकृतव्यूहपरिभाषयाऽलौकिकवाक्यस्थानामकचो निवृत्तिसिद्धेः किं तदर्थं समास इति लौकिकवाक्यनिवृत्त्यर्थमेव तत्स्यादिति वाच्यम्। तृतीयासमास इति समासस्यैव त्वन्मते सर्वनामत्वनिमित्तेरवयवस्य सर्वनामत्वादकृतव्यूहपरिभाषाऽप्रवृत्तेः शविषयेऽतिभवकानित्यत्वेवाकृतव्यूहपरिभाषानभ्युपगमादित्यलम्। अच इञ्हे च प्रविष्टानां सर्वादीनां सर्वनामसंज्ञा निषिध्यते तेन मासपूर्वाणां पूर्वापराधः

त्यादावामो न सुट् । समुदायस्य संज्ञानिषेधे
वयस्य सर्वनामत्वात्तदन्तविधिनाऽङ्गाधिकारे तस्य
ुत्तरपदस्य चेति सर्वनामोत्तरपदत्वात् सुट् स्यात् ।
मपि सर्वनामसंज्ञायां तदन्तविधिसद्भावात् सर्वा-
त्वात् समुदायस्य सर्वनामत्वात् सुट् दुर्वारः
ामसंज्ञायां तदन्तविधयभावस्य प्रागेव प्रप-
त्वात् । परन्तु ह्रस्वे यानि सर्वादीनीति न सम्बन्धः
काणां क्रियायैवान्वयात् । न च विद्यमानानी-
ाहारः गौरवात् । निषेध्याया भवतिक्रियाया
प्राधान्येन तदन्वयस्यैव न्याय्यत्वाच्चेति । तच्चिन्त्यम् ।
दीनि सर्वनामानीति नेति च ह्रस्वे चेति सूत्रेऽनु-
ने तथाच ह्रस्वे सर्वादीनि सर्वनामानि न भव-
ति वचनव्यक्तिलिङ्गेषु सर्वाद्यधिकरणनिषेधस्यैव ला-
घवेनान्यगत्या विद्यमानानीत्यध्याहारस्वीकारात् ।
ले देवदत्तो न पचतीत्यत्र भूतलस्यैवेहापि ह्रस्व-
ध्याहारं विनैवान्वयाच्च ॥

पह्रस्वौ—।

ओर्षं छन्दसीत्यतः छन्दसीत्यनुवर्त्तते ऽपोभीति-
स्थे मासञ्छन्दसीतिवार्त्तिके छन्दोग्रहणात् क्वचि-
त्रायामपि पदादयो भवन्तीति ज्ञाप्यत इत्याञ्जरिति

कैय्यटः । काशिकायान्तु केचिच्छन्दोग्रहणमनुव
न्तीत्युक्काऽन्ये नानुवर्त्तयन्तीति मन्तारं पङ्क्त्वा सुह
ख्य चेतिभाष्यप्रयोगोपष्टब्धमुक्तम् । युक्तं चैतत् । द
स्तीत्यस्य ये च तद्धित इत्यत्राननुवृत्तेर्हरदत्तादिसं
ज्ञान्मण्डूकप्लुताश्रयणे स्वरितत्वकल्पने च गौरवा
मानाभावात् । मासञ्छन्दसीति छन्दोग्रहणान
र्थाच्च । यत्तु निर्जरस इत्यत्र रामयोरित्यादौ च
नपुंसकस्येत्यादि भसंज्ञान्तमनुपन्यस्य दतः दतेत्
पन्यस्तम् । तदनवधानात् । तथाहि । स्वादिष्विति
त्वस्य प्रगनुक्तत्वेन तन्निमित्तरुत्वयलोपप्रसक्तौ
दृत्तये भत्वमप्यनुपन्यसनीयमिति निर्जरस इ
रामयोरित्यादौ च नोक्तोपन्यास इति यदि तदा
दतेत्यत्राप्युक्तरीत्या जशोऽप्रसक्तौ तदुपन्यासो व्य
यदि च कार्यान्तरार्थेन स्वादिष्विति पदत्वेन प्रस
जशो निवृत्तये भत्वस्य ततः पूर्वमनुवृत्त्यर्थसुपर्ज
स्य सुदृक्ष्यामित्यादावर्थमवश्यं वक्तव्यस्य च स्वीदि
पदत्वस्य ततः पूर्वं च तदुपजीव्यस्य सर्वनामस्था
ज्ञासूत्रस्थ दतः दतेत्यत्रोपन्यसनन्तदा निर्जरस इ
त्रापि तुल्यम् ॥

अन्नोपोऽनः ।

अत्र प्राञ्चः । अन्नन्तस्य भस्याङ्गस्याकारस्य

ाऽिति तथा सत्यनस्लक्षणेत्यादावतिव्याप्तिरिति केचि-
। तन्न । प्राचां ग्रन्थे हि भस्येत्यकारस्य विशेषणां
र्थं कार्यकालं संज्ञापरिभाषमिति यजाद्यसर्वना-
स्थानपरस्येति। तत्परञ्च येननाव्यवधानमिति न्यायेन
कारमात्रव्यवस्थितस्याकारस्य गृह्यते तेनोक्तदोषान-
काशात् । अत्र च व्याख्यानेऽल इत्यस्याङ्गेन सामाना-
धकरण्यान्वयोऽनुभूत: अङ्गावयवस्येति व्याख्याने तु
ाप्यधिकरणान्वयाप्तिरिति । यूषा इत्यत्राङ्गोपस्य
थानिवद्भावे तद्भावे वा न षात्परत्वप्रयुक्तो णः । किं
नादो ऽङ्ग्यत्राय इति द्वितीये ष्टुत्वेन। तथा च षगृह्णमु-
त्तरार्थमित्याकरे स्थितमितीह रषाभ्यामित्यस्योपन्या-
सो रभसादिति प्रकाशोक्तावुत्तरार्थतयापीह षगृह्णां
स्थितम् । ततश्च यूषा इत्यादौ रषाभ्यामित्यस्य प्रवृत्तिः
कीन वार्यतामिति केचित् । तन्न । षगृह्णमुत्तरार्थमि-
तिवृत्तिग्रन्थमडादिव्यवायेपि णत्वं वक्ष्यति तस्मादपि
यथा स्यादिति मिश्रैर्व्याख्यायाथेहार्थमपि कस्मान्न
भवत्यत आह ष्टुनैव सिद्धमेतदित्युत्तरग्रन्थोऽवतारि-
तस्तेन प्रयोजनाभावाद्रषाभ्यामित्यत्र षो न सम्बध्यते
किंत्वट्कुप्वाङ्नुम्व्यवायेऽपीति प्रतीतिः। तस्मादिह रषा-
भ्यामित्युपन्यासो रभसादिति युक्तमुक्तम् । यत्तूत्तरा-
र्थतयापीह षगृह्णं स्थितमित्युक्तिः सा न प्रवृत्तिप्रयो-

गिनी । तस्येह स्थितत्वेपि न नकारेण सम्बन्धः जनाभावादिति । यत्तु पद्दन्न इति सूत्रे प्रभृति प्रकारार्थं तेन पदङ्घ्रिश्चरणोऽस्त्रियां, स्वान्तं हृन मन इति सङ्गच्छत इति । तदयुक्तम् । एतेषां दीनां पदाद्यादेशत्वे पादादिभ्यः पृथक् पद च्चनस्य कोणऽसंगतत्वात् । न हि स्यान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति । स्यान्युपादानेनैव त भिधानसामर्थ्यादादेशस्यानुपादानेपि क्वत्यभाव अत एव दन्तनासिकानामपि दत्नासादीनाममर भिधानमिति । न च पदाद्यादेशानां छान्दसत्वेन छाषाविषयत्वं न सर्वेषामिति दतादीनां कोश न्यासेन विरोधो न विरुद्ध इति वाच्यम् । पदादीनां सत्वस्य प्रागेव प्रत्याख्यानात् । उक्तज्ञापकेन शब्दस्य भाषाविषयत्वावश्यकत्वे तदनुपन्यासः व्यापरिहार्यत्वाच्च । किंच पदङ्घ्रिरित्यादौ पद पादाद्यादेशपदाद्यनुकरणानीति न प्रकृते प दैर्घ्यत्वं पदादीनामिति न प्रकृतसङ्गतिः ॥

आङो नाऽस्त्रियाम् ।

पुंसीति नोतं नपुंसके अमुनेत्यसिध्य सुखखासिध्या ङकोऽचीति नुमोऽप्रवृत्तेः ना

नासिद्धं न सु न इति निषेधात्। यत्तु इति निषेधो नुम्येवास्तु नेत्यकारस्योच्चारणार्थं ति वाच्यम्। असुभ्यै कुलायेत्याद्यसिध्यापत्ते- । तत्र नुम्यसुनेत्यसिध्यापत्त्या शङ्काया निर्मूलत्व- ् एतदनुक्तेर्न्यूनत्वं चेत्यवधेयम्। नच नेत्युक्त्या ोऽपि संग्राह्यः। तत्र विशिष्टविधाने नकारविधा- ाच्च । किं च स्यादौ सुत्वस्यासिद्धत्वेन पूर्वं ादिसिद्धौ सत्यपि सुत्वेऽजादिपरत्वाभावान्नुम- ौ कथमसुभ्य इत्याद्यसिद्धिरिति॥

अच्च घेः।

ञ्चदिति तपरत्वं बुद्धावित्यादौ टाव् माभूत्। औत- ं स्वरितार्थम्। न विभक्ताविती्वनिषेधस्तु नानित्य- ्इति तत्रैवोक्तमिति प्रकाशः। तत्र इतीति हेतौ। ोक्तं न विभक्ताविति्यत्रैव ङेरैतश्च तकार उच्चार- ं इत्युक्तमित्यर्थः। तत्र चकारोऽतस्तकारसमुच्च- ः। तुपाठे तु स चार्थः। तथा चानित्यत्वान्निषेध- ाद्या सम्भावितत्वमिति प्रसक्तं स्वरितत्वं लक्ष्य- ानान्नास्तीति प्रयोजनाभावादौत्सर्गिकनिषेधाच्च ारस्यनेत्संज्ञा। संनिप- ्रभाषया टावभावसिद्धेरे- ारणार्थत्वमेवेति भावः। एवं च यथाश्रुतार्थमर्थमभि-

प्रेत्य पूर्वापरविरोधाद्युक्तावनं कोपाञ्चित् प्रत्युत
युक्तं चोच्चारणार्थत्वं न तु स्वरितार्थत्वं स्त्रीर्णं
सभिधाने अमनाम्नित्यादौ स्वरितत्वादर्शनादिति ।
ल्यम् । औतः स्वरितत्वेऽप्यनिघ्नशब्दाकारस्योदात्तेः
स्वरितेन सहैकादेश उदात्तेनेत्युदात्तैकादेशनि
स्वरितत्वादर्शनसम्भवेनौतः स्वरितत्वाभावे प्रक्ष
र्णं तद्दर्शनस्याप्रयोजकत्वात् । क्षावरमित्या
त्तार्थमेकादेश उदात्तेनेत्यत्रानुदात्तस्येत्यनुवृत्तेस्तै
प्रतिपादनादिति । यद्यप्युतस्वरितार्थमपि नार्त
तीत्येके । तन्मन्दम् । औतः स्वरितत्वेनाव्ययनि
घच्छेषनिघात उदात्तैकादेशासंभवादिति ॥

अनङ् सौ ।

सोर्डविधानेन सिद्धेऽनङ्विधानं क्वचिदना
मां ज्ञापयति तेनोशनसः सम्बुद्धौ वाऽनङ् वाच्य इ
क्षव्यमिति प्राञ्चः । तच्चानङ् साधित्यतः
किं लाघवं ङित्त्वसामर्थ्येन टिलोपविधिक
प्रत्युत गौरवम् । अस्यैव सूत्रस्य चटुशनसित्यत्र
भीयत्वेनोशनेत्यत्र सर्वनामस्थाने चेति दीर्घप्र
क्रियत्वम् । गौणत्वेऽप्यनङ्णित्वे भक्षत: । येन वि
धिस्तदन्तस्य परमसखायादित्यादेर्भाष्ये उदाहरण

त्रोहिः तत्पुरुषे हि टचा भाव्यमिति कैयटेन तद्व्या-
ात् । नेति हरदत्तः । अत एव शेषोऽध्यस-
ते सूत्रे शोभनः सखाऽस्य सुसखिरिति स उदा-
र । व्याससकारोऽप्येवम् । तयोरयं भावः । समा-
विधेरनित्यत्वेन भाष्यं तत्पुरुषपरमिति ॥

हल्ङ्याप्—॥

ननु संयोगान्तलोपेन सिद्धौ किमाद्यच्छब्दे-
ते चेन्न । संयोगान्तलोपस्यासिद्धत्वेन सखेत्यादौ
ोपानापत्तेः । अभिनोऽचेत्यादयसिद्धेश्च । हरदत्तस्तु
ङिसम्बुध्योरिति ज्ञापकान्नकारविभक्त्योरानन्तर्ये सति
ोगान्तलोपस्यासिद्धत्वेन सखेत्यादौ नलोपसिद्धिः ।
ारित्याद्युत्तया प्रचन्नित्यत्र नलोपो नेति । अत्र प्रकाश-
तः । नैतद्ज्ञापकं हे चर्मन्निति नपुंसकार्थत्वादिति ।
त्र केचित् । नपुंसके लुका लुप्ते प्रत्ययलक्षणाभावेन
म्बुद्धौ वा नपुंसकानां नलोपो वाच्य इत्यस्यावश्यकतया
सम्बुद्धिग्रहणस्य नपुंसकविषयत्वासंभवेनोक्तज्ञापक-
ानित्यत्वादिति तन्न । न लुमतेत्यस्यानित्यतया
त्ययलक्षणासम्भवेन तेन च सम्बुद्धौ वेत्यस्या-
ावश्यकतया सम्बुद्धिग्रहणस्य नपुंसकविषयत्वस-
भवात् । यद्यभिनोऽचेत्युत्वमपि संयोगान्तलोपो

रोरुत्वे इति सिद्धकाण्डे पाठात् सिद्धमि
तदपि चिन्त्यम् । उत्वे सिद्धत्वेऽपि पूर्वरूपत्वे
वात्तदसिद्धेस्तादवस्थ्यात् संयोगान्तलोपापवादे
गादिलोपे वोरिति दीर्घासिद्धे सुपीत्यादयसिद्ध
युष्ट ङ्यन्तादावस्मादित्यादिप्रक्रियाग्रन्थयोजनं
पादवधेयम् । एवमन्यत्राप्यूह्यमिति संक्षेपः ।
स्मद्युष्मत्षट्संज्ञकास्त्रिषु सरूपा इत्याचार्यवचः
त्त्वव्ययमिष्ट न पठन्ति । अव्ययानां निर्लिङ्गत्वा
भावस्य स्त्रीत्वमपि लिङ्गान्तराभावाच्चेति च
तुमाज्ञः । तच्चिन्त्यम् । त्रिषु सरूपा इत्यस्य लिङ्ग
प्रयुक्तकार्यविशेषरहिता इत्यर्थस्वीकारात् । य
त्त युष्मदस्मदोर्लिङ्गयोगस्य भाष्यकैयटयोरा
तद्धितश्चासर्वविभक्तिरिति सूत्रे कैयटे च षट्सं
लिङ्गयोगस्यात एव तेभ्यः स्त्रीप्रत्ययनिषेधप्रत्याख्य
कञ्सूत्रे कैयटे स्त्रियामितिसूत्रस्थभाष्ये चोक्तत्वे
तेः । न च युष्मदस्मद्भ्यां टाबभावाय टिलोपपक्ष
ङीकारेण षड्भ्यः स्त्रीप्रत्ययनिषेधेन चास्मद
लिङ्गायोगपक्षस्याप्यनुमितत्वात्तत्पक्षाभिप्रायेण
तेऽप्युपपत्तिरिति वाच्यम् । तथा सत्यलिङ्गासं
यमिति तद्धितश्चेति सूत्रे भाष्यकृताऽव्ययादाप्सुप
त्राव्ययस्यालिङ्गत्वेनाब्ग्रहणप्रत्याख्यानस्य वार्त्ति

त्वेऽप्यव्ययादाप्सुप इत्यनेन सदृशं त्रिषु लिङ्गेष्वित्यनेन चाव्ययस्यापि लिङ्गयोगपक्षस्यानुमानेनाव्ययत्यागस्यानुचितत्वात् । अव्ययीभावस्य भाष्येऽव्ययत्वप्रत्याख्यानाच्च । यत्त्वबङ्ग्रवचनान्तं कौरव्यादिशब्दमदन्तेष्वनुपन्यस्येदन्तेषु तादृशस्यौडुलोमशब्दस्योपन्यसनम् । यच्चादन्तेषु उडुलोमा इति नित्यबङ्ग्रवचनान्तमनुपन्यस्येदन्तेषु तदुपन्यसनं तदनवधानात् । आचार्यैस्तु तद्धितनिरूपणप्रस्तावे गार्ग्यादीनामुक्तवैलक्षण्यस्य स्फुटत्वादिह ते नोपन्यस्ताः ॥

एरनेकाचः—।

अत्र गतिकारकेत्यादिप्रक्रियाग्रन्थे क्विबन्तस्येति स्वर्णदृष्टिश्चेपा तत्र यथाश्रुतो नानियमः । निन्युरित्यादौ यणभावापत्तेः किन्तु विशेषविषयः । विशेषश्च पदपूर्वोपधस्येति वार्त्तिकोक्तो गृह्यते विशेषान्तरस्यानुपस्थितेः । तथा चोपधापूर्वस्मिन् पदे गतिकारकत्वनियमोऽनेनोच्यते । एवं च पदपूर्वोपधस्याङ्गस्य चेद्गतिकारकपूर्वोपधस्यैवेति पर्य्यवसितम् । तेन परमधियौ देवदत्तपरमधियावित्यादौ न यण् । परमदीध्यौ परमप्रध्यौ निन्यतुरित्यादौ यण् भवति । यत्तु गतिकारकेतरपूर्वपदस्य यण् नेष्यत इति । तन्न देवदत्तपरमधियावित्यत्र

यण् स्यात् । परमदीध्यावित्यादौ च न स्यादिति दो
दुर्धियः वश्चिकभिये त्यादौ दुष्टा धीर्यस्येत्यर्थे
धीशब्दार्थक्रियायोगाभावेन तं प्रत्यगतित्वात् व
कसम्बन्धिनो भीरित्युत्तरपदलोपिसमासे वश्चिक
कारकत्वाच्च न दोष इति केचित् । तच्चिन्त्यम् प्र
धीरित्यादाविवेच्छापि धीशब्दार्थे दुःशब्दार्थान्त
त्तस्य गतित्वानपायात् । अन्यथा तत्र प्रध्यं प्रध्य
स्वग्रन्थविरोधात् । ग्रन्थान्तरविरोधाच्च ॥

ख्यत्यात्—।

वेति केचिदिति मूलमुपादाय ख्यत्यादिति
तिनिर्देशो यणविषय एवोत्वं यथा स्यादिति
विषये मा भूदतिसखिरागच्छतीत्येवमर्थं स्यादिति
योर्ग्रहणे न प्रमाणमिति तेषामाशयः । तेनोत्वा
सख्यः सूख्य इत्यादि भवति । उभयमप्येत
स्थितमिति प्रकाशः । तत्र यद्यपि दीर्घग्रहणा
णाभावो न विकल्पवादिनामाशयः तथा सति
र्घ उत्वस्याभावेन विकल्पासिद्धेः । तथापि विक
र्देशेन दीर्घयोरपि ग्रहणमिति प्रागुक्तव्याख्याते
तदीर्घग्रहणम् । एवं चैतद्भाष्यकैयटापर्यालोचनमू
मिति केषाञ्चिदुक्तिरप्यनवबोधनिबन्धनेति ध्ये

शुक्युः पक्युरिति प्रकाशस्तत्रेत्थं सूपपत्तिः यद्यपि
गपूर्वंकस्येति च भाष्यादसंयोगाद्यः । एतच्च
ादित्यस्वरसाविष्करणं प्रमाणाभावव्याख्यामेदङ्कृतो
ल्प इति तदाशय इति भावः । उभयमप्यौत्सर्ग
विषय एवोत्वं दीर्घयोर्ग्रहणं वेत्यपूर्वस्येति
षेध इति ज्ञायते तथा च पूर्वस्माद्विधौ स्थानिवद्भा-
क्वचि चेति विहितेऽकारस्याभावे संयोगपूर्वस्येव-
। प्रतिषेधाभावे यणो दुर्वारत्वेनोत्वस्यापि प्रवृत्तौ
ाकाभावादिति दिक् ॥

इत्यजन्ताः पुंलिङ्गाः ।

यक्षावन्ते लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वा-
ते । तद्भसात् । नहि लिङ्गविशिष्टपरिभाषया प्रा-
तिपदिकत्वं भवति । न च लिङ्गविशिष्टपरिभाषयेति
दिष्यन्वेतीति वाच्यम् । रमाशब्दस्य प्रातिपदिक-
भावेन प्रतिपदिकत्वादित्यस्यानुचितत्वात् । एका-दे-
श पूर्वान्तत्वेन ग्रहणात् प्रातिपदिकत्वोक्तौ लिङ्गवि-
शिष्टपरिभाषोपन्यासस्य वैयर्थ्यात् । उभयोर्हेतुत्वेनोप-
ास इति यदि तदा समुच्चयार्थकचकाराद्यनुक्तेर्न्यू-
ता । न चाप्रातिपदिकत्वाल्लिङ्गविशिष्टपरिभाषया
ादय इत्यन्वयः । लाघवादप्रत्यय इति पर्युदासस्य

प्राक् स्वयं स्वीकारादेकादेशस्य पूर्वान्तत्वेन ग्रह
प्रातिपदिकत्वात् । निषेधेऽपि प्राक् प्रवृत्तप्रातिपदि
त्वस्यान्तवत्त्वेन सत्वादप्रातिदिकत्वस्य हेतोः स्वरूप
ङ्हेः । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य स्त्रीप्रत्ययवि
ष्टस्य ग्रहणमिति लिङ्गविशिष्टपरिभाषार्थः । त
प्रातिपदिकग्रहणे आबन्तस्यापि ग्रहणादुक्तपरिभा
ष्टस्वीकारेणाबन्तत्वादित्युक्तेरेव युक्तत्वादिति ॥

सर्वनाम्नः स्याट् ।

अत्र याडित्यनुवर्त्य सप्तम्या विपरिणमय्य त
परतो याट्संनियोगेन सर्वनाम्नोऽसुङ्विधानेन
स्याट्ह्रस्वविधानं चिन्त्यप्रयोजनमिति प्रकाशः ।
सुङ्विधानेऽमुष्यै इत्यादि न सिध्येदिति केचित् ।
आबेकादेशस्य परादित्वेन प्रत्ययत्वात्तदादेः
सुङः प्रत्ययत्वेन तदवयवस्य सस्य षत्वेऽमुष्यै इत्
सिद्धेः। अत एवातिखट्व इत्यादावेकादेशस्याप
दादेशस्य ह्रस्वस्यान्त्वेन ततः परस्य सोर्लोपो दी
र्घेण वारितः । न च सर्वनामत्वाय पूर्वान्तवत्वे
वश्यकत्वे उभयत आश्रयणादन्तादिवत्वाभाव इ
च्यम् । लिङ्गविशिष्टपरिभाषयान्तवत्वाभावेऽपि स
मकार्यसम्भवात् । एकस्मिन् कार्ये उभयत आश्र

भावाच्च । न चैवमप्यसेरिति सान्तप्रतिषेधादुत्वमत्वे न स्यातामिति वाच्यम् । असेरित्यस्य अः सेर्यस्येति क्रतत्यदाद्यत्वस्येत्यर्थाश्रयणात् । न चादोऽनादेरित्यत्यद् दृत्यत्रोत्वाद्यभावस्य ओकारसकारविशिष्टसहितस्य प्रतिषेधो वाच्यस्त्रादस्यतीत्यचादेसो ऽपदत्वादिह च पदाधिकारादुत्वाद्यप्राप्तौ सग्रहणमनर्थकमित्यपदस्याप्यदस उत्वादि ज्ञापयति तेनासुमित्यादि सिध्यतीत्याकरसिद्धं तच्चैवं सति विरुध्येतेति वाच्यम् । लाघवोपष्टम्भस्य अः सेर्यस्येति व्याख्यानस्यादोऽनेत्याद्यतिप्रसङ्गवारकस्याप्याकरसिद्धत्वात् । न सुन दृत्यस्य चोक्तार्थज्ञापकत्वादिति न कश्चित् क्षुद्रोपद्रवः । यत्तु वस्तु तस्तु आमि सर्वनाम्नः सुट् याटो ह्रस्वश्चेति सूत्रयितुं युक्तं न चैवं याट एव ह्रस्वापत्तिः । दीर्घोच्चारणसामर्थ्यात् । ह्रस्वोच्चारणेऽप्यकारसामर्थ्यादेवातो गुणस्य वारयितुं शक्यत्वादिति तन्न एवं हि सति नेस्त्रय इत्यादावनुवृत्तस्यामीत्यस्य याट इत्यत्रापि सम्बन्धे सर्वस्यामित्यादौ ङेराम्येव याट् स्यात् न तु सर्वत्र व्याख्यानमत्र शरणं च मण्डूकप्लुतेश्चाश्रयणं च सूत्रविपर्यासो न चमत्कारमावहतीति किञ्च कथं दीर्घोच्चारणसामर्थ्यं न हि याटो ह्रस्वाभावेऽपि दीर्घोच्चारणस-

र्थंवङ्गवतीति ङ्खलोच्चारणोऽपीत्यादिना भवदुक्तस्यै
र्थक्यस्यापरिहारादिति ॥

विभाषा दिक्समासे—।

न बहुव्रीहाविति निषेधे प्राप्ते विकल्पोऽयं प्रकाशस्तद्दापातत: । तस्यालौकिकप्रक्रियावाक्या तसर्वादिविषयत्वादस्य च समासविषयत्वादिति कैं तन्न तस्यालौकिवाक्यविषयत्वेऽपि समास एव प त्वात् । यत्तु अतिखट्वायेत्यत्र लाक्षणिकत्वान्न एवमतिसर्वायेत्यत्र न स्यादिति वदन्ति । तत्र न च्च शविषये लक्षणप्रतिपदोक्तपरिभाषा प्रवर्त्तते अति वैयर्थ्यापत्ते: स्याटस्तत्सम्भव एव नास्ति संज्ञोपसर्ज पाठात् पर्युदासादिति केचित् तच्चावानवबोधात् । च्चयं भाव: । याडाप इत्यादावङ्गाधिकारादाबन्ता परस्येत्यादिरर्थस्तच च प्रत्ययग्रहणे यस्मात् स वि इति तदादिग्रहणस्य स्त्रीप्रत्यये निषेधेन प्राप्तोऽपि लाक्षणिकत्वाद्गौणत्वान्न । गुणभूतस्त्रीप्रत्यये तदा यमाङ्गीकारात् । गौणलाक्षणिकयोर्हि लोकप्रय प्रसिद्धम् । तच्चाद्ये आपो विवक्षितमुत्तरत्र च व ढ्यस्येति विशेष इति ।

ङिति ह्रस्वश्च ।

यच्चत्र नित्यस्त्रीत्वमोदूतोर्विशेषणं ह्रस्वयोस्तु स्त्रियामित्येव न तु नित्यस्त्रीत्वपर्यन्तमिति केचित् तन्न। अतिस्त्रियै ब्राह्मण्यै इति भाष्योदाहरणान्यलिङ्गान्तरानभिधायकत्वरूपस्य नित्यस्त्रीत्वस्येदृद्विशेषणत्वायोगात्। अत एव ङिति ह्रस्वश्चेत्यनेवंविधो नियमो नाश्रीयत इति सामान्यत एव कैयटेनाभिहितं पदान्तरसमभिव्याहाराभावेऽपि स्त्रीत्वबोधकत्वरूपस्य तु ह्रस्वयोरपि सम्भवात् अत एव नित्यस्त्रीत्वप्रापकस्याख्यत्वेन ह्रस्वो विशेषितः काशिकायाम्। हरदत्तेनाचाख्यापदकृत्यव्याख्यावसरे आख्यपदसामर्थ्यात् पदान्तरमनपेक्ष्य यौ स्त्रियामाचक्षाते इत्याश्रीयते ह्रस्वग्निप्रभृतीनां तूभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति ङिति ह्रस्वश्चेति संज्ञा भवत्येवेत्युक्तम्। न च व्यावर्त्याभावाद्ध्रस्वांशे न नित्यत्वसम्बन्धः। अतिकौण्डिन्यादीनां व्यावर्त्यानां सद्भावात्। दृक्षुलाग्रामणीखलप्वोरेवानित्यस्त्रीख्यावित्यत्र वर्णयोः ईदूदंशोऽपि नित्यात्वं(?) व्यावर्त्याभावात्र कुल्यर्ङ्जरतीयख्याप्रामाणिकत्वादिति। इदं त्ववभाव्यमेव। स्त्रयाख्यावित्यत्र वर्णयोः संश्लिष्टे एकसंज्ञाश्रि-

कारादङ्गसंज्ञया नदीसंज्ञासमावेशो न स्यात् ।
च वात्सीबन्धो इत्यत्र गुरोरन्त इतीकारस्य प्लु
स्यादिति तदन्तस्यैव नदीसंज्ञोक्ताचार्यैः । तत्राङ्गाधि
तदन्तविधिसत्वे लक्ष्म्यादावङ्गाधिकारे तस्य च तदु
दस्य चेति व्यपदेशिवद्भावेन वा आङादिसिद्धिरित्या
यः । न चैवमाच्छीनद्योरित्यनेन तुदन्तीत्यादौ कृ
शतुर्नदीपरत्वाभावादिति वाच्यम् । तत्र नदीग्र
स्वरितत्वेन तदवयवस्य ङीपो नदीशब्देन ग्रहणा
स्वरत्वसम्भवात् । एतेन जानतीत्यादौ शतुरनुम
नुमः शतुः परायां नद्यां उदात्तत्वं व्याख्यातम् ।
तु संज्ञासमावेशप्रयोजनाभावाद्वर्णयोरेव नदी
त्वम् । तदन्तस्यापि नदीत्वे ह्रस्वत्वभावः । ङेरामि
नद्यन्तलोक्तिस्तु पक्षद्वयसाधारणी । अङ्गाधिकारेण
न्तविधिलाभात् ॥

इदं व्याख्यानम् ।

यत्त्वेतत्सूचानुपन्यसनं प्राचः प्रामादिकं
तन्न । परत्वाद्दौत्वेऽपि पुनः प्रसङ्गविज्ञानेन ङे
त्येव सिद्धे रेतत्सूत्र मनादृत्य(?)चेष्टवाच्चित्वात्तमपि
इति किमिति प्राचा ध्वनितत्वात् ॥

अचि र-।

ननु मध्येऽपवादन्यायेनोत्वदीर्घौ बाधतां गुणन्कथं बाधेतेत्याशङ्क्यापवादशब्दस्य बाधकत्वोपणत्वात् परशब्दस्य चेष्टवाचित्वात्तमपि बाधते इति ाशङ्कतः। तन्निर्मूलं क्लिष्टं चेत्यन्ये। तन्न। अर्चि-देशे जस्युपसंख्यानगुणपरत्वादिति मूलसत्वात्।

सति बाध्यविशेषचिन्ताङ्गीकारे उक्तोपावश्यक-च्च। जस्ग्रहणं ङिसर्वनामस्थानोपलक्षणं प्रियतिस्रा-ति भाष्ये उदाहरणादिति कैयट इत्यास्तां तावत्॥

इत्यजन्ताः स्त्रीलिङ्गाः।

अतोऽम्।

यत्तु मित्येव च्छेदो लाघवात्। तत्र सोमै ज्ञातै ानमिति सिद्धं द्वितीयैकवचने त्वादेः परस्येत्यका-स्य मकारे अत इति तकार उच्चारणार्थ इति वतैवोक्तत्वान्निमित्तस्याकारसन्निपातस्य दीर्घे सत्यय बरोधात्। प्रकाशकृतस्तु सुपिचेति दीर्घस्तु प्राप्ती-त सन्निपातपरिभाषया अनित्यत्वादित्याहुः। केचित्तु ीर्घविधौ सा न प्रवर्तत इत्यनूद्य रुधादिभ्यः श्नम्

स्यान्नलोप इति सूत्रयोः सुपि चेति दीर्घत्वे सं
तपरिभाषाप्रवृत्तेर्भाष्यकृता ध्वनितत्वाच्चायुक्तमि
तेषामयं भावः । कष्टायेत्यादिज्ञापकेन कल्पितं
न यमात्रविषयमपि तु सुपि चेत्येतद्विषयमात्रपर
थाऽसन्देहाल्लाघवाच्च मत इत्येवावक्ष्यत् । अत एवै
स्वादिति सूत्रे भाष्ये हल्ग्रहणाननुवृत्तौ हे कृष्ण
द्यावादेः परस्येत्यकारलोपे सुपि चेति दीर्घत्वे हे कृ
मिति प्रसज्येतेति कृधादिसूत्रस्थभाष्यविरोधादि
रामायेत्यत्रत्यप्रक्रियाप्रदीपादवधेयम् । यत्तु
मांसेत्यादुपन्यस्य वस्तुतस्तु प्रकृतिग्रहणं प्रकारा
त्युक्तमित्यादि तच्च सन्दर्भशुद्धिः कथमिति चिन्त्य

अस्थिदधि—।

प्रियदध्नेत्यत्र दधिशब्दस्योरः प्रभृतित्वेन
कब् प्रियदधेति भाष्योदाहरणेनानित्यत्वान्न ।
तयोदाहरणं भाष्ये न दृष्टमिति नास्तीति वाचित
शंनस्याभावासाधकत्वात् । सार्वत्रिकस्य च तस्यासि
जरायाः इति सूत्रे नुमनडोर्वि प्रतिषेधस्य दध्ना सक
दाहरणे सकलपुस्तकसिद्धे सक्थिशब्दानडुवका
प्रियसक्थनेत्यस्यैव दधिशब्दानडुवकाशस्य प्रियद
स्यावश्यकत्वाच्च दध्ना तस्योपलम्भाच्चेति । मधुश

प्रत्ययेत्यमस्तु साग्वादय इति जरन्तः। अत्र मधुशब्दस्य नपुंसकमात्रवृत्तित्वेन स्नुः प्रत्ययः सानुरश्नियामिति पुंनपुंसकसाधारणसानुशब्दस्य कथं तत्साध्यं अत एवैवं मध्वादय इत्युक्ता सानुशब्दः पृथगव्युत्पादितो ऽन्यैरिति नाशङ्कनीयम्। "मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्हचीदिगणे पाठात् पुंन्नपुंसकयोर्मधुरिति" शाश्वतकोशे पुंनपुंसकत्वेन मधुशब्दस्योक्तत्वात्। मकरन्देऽप्यर्हचीदिषु मधुशब्दस्योदाहृतत्वाच्च। स चोक्तकोशबलाद्विषयविशेषे एव "मधुमङ्कनाः स्मरसखं रसखण्डनवर्जितमिति" रघुश्लोके उक्तावष्टम्भेन मधुशब्दं मल्लिनाथो व्याचख्यौ। मधोरुष्मा इवासत इत्यादिलिङ्गव्यत्ययोदाहरणान्तु भाष्ये क्षीरवाचिनित्यनपुंसकमधुशब्दाभिप्रायेण। एवं च नित्यनपुंसकमधुवद्स्वुशब्दः पुंनपुंसकमधुशब्दवच्च साग्वादिशब्दा इत्यर्थ इति। प्रियक्रोष्टृणीत्यत्र परत्वात्तृज्वद्भावे पुनः प्रसङ्गविज्ञानादजन्तलक्षणो नुमिति व्याचख्युः। यत्तु ह्रस्वौवत्तृज्वद्भावयोर्नुम् पूर्वविप्रतिषेधेनेति भाष्यवार्तिकविरुद्धमिदमिति। तन्न। पूर्वविप्रतिषेधे क्रमक्रोष्टुने अरण्यायेति भाष्योदाहरणेन काशिकायां विभाषा तृतीयेतिसूत्रे एवैतद्वचनोदाहरणेन चास्य पूर्वविप्रतिषेधस्य विभाषेति तृज्वद्भावविषयत्वावधारणात्। न च वैकल्पिक-

कट्टज्वङ्गावग्रहणवैयर्थ्यमिति वाच्यम् । प्रियक्रो
त्यादिव्यट्त्या तस्यार्थवत्त्वात् । न च तृज्वङ्गावेन पर
न्नुमो बाधे सङ्गतिन्यायाश्रयणेन पुनरप्रवृत्तौ ।
क्रोष्टे इति स्यात् । तच्च प्राच्चिकं पुंवङ्गावेनेष्टमे
वाच्यम् । प्रियतिस्रृणी इत्यादौ तिस्रृभावेन व
तस्य नुमः पुनः प्रसङ्गविज्ञानेन प्रवृत्तेरिहापि त
ङ्गावेन बाधितस्य प्रवृत्तेः प्रसङ्गात् । अत एव सं
तपरिभाषया न नुमित्यप्यनाशङ्कनीयम् । नुमः
वयवत्वेन सन्निपातविघातकत्वाभावाच्चेति दिक् ।
इत्यनेकदेशविकृतस्यापि प्रद्युशब्दस्य प्रद्योशब्द
न्यत्वाङ्गाषितपुंवत्वविकल्प इति प्राञ्चः । नन्वेकदे
कृत्तमन्यवदित्यस्य भाष्येऽनाश्रयणात्तत्प्रयोजनस्य
निवदादेशोऽनल्विधावित्यनेन साधितत्वात् प्रकृते
दनुपपत्तेः कथमेतत् । अयं हि स्यानिवद्भावः शास्
कार्यातिदेश इति सिद्धान्तात् प्रकृते च पुंवङ्ग
शास्त्रीयस्यानिकार्यत्वाभावात् भाषितपुंस्कत्वस्य श
यत्वाभावादिति चेत् । इत्थम् । स्यानिवदादेश इ
शास्त्रीये कार्ये कर्त्तव्ये स्यानिधर्मः शास्त्रीयोऽभा
वा ऽतिदिश्यते । अत एव दृक्षायेत्यत्र स्या
प्रवर्तमानेऽपि सुपि चेति दीर्घत्वे कर्त्तव्ये स्यानि
वेन सुप्त्वमाश्रितं भाष्ये एतदर्थमेवोक्तं स्यन्यव

वानल्लिधाविति निषेध इति अत एवावधिष्टेयचाङो
मह्न इत्यात्मनेपदे कर्त्तव्ये ऽशास्त्रीयस्यापि हन्ति-
स्यातिदेशः । न च स्वं रूपमिति शास्त्रीयाया हन्सं-
ज्ञाया हन्हातिदेशः स्वं रूपमित्यस्य साध्ये प्रत्याख्या-
तृ । अत एव च समाद्येत्यत्र रायल्लोपाविति पूर्ववि-
तिषेधेन णिलोपे प्रत्ययलक्षणेन वृद्धौ स्थानिवद्भा-
वादिवादृदो जग्ध्यादेशप्रसङ्गः स्थानिवदादेश इत्य-
शास्त्रीयमपि स्थानिगतमनादिष्टादचः पूर्वत्वमचः
परस्मिन्निति शास्त्रीये कार्ये कर्त्तव्येऽतिदिश्य णिलोपस्य
स्थानिवद्भावेन निराकृत आकरे । एवं च स्थानिगत-
नाषितपुंस्कत्वमतिदिश्य द्युशब्दे पुंस्त्वविकल्पप्र-
र्त्तनं निर्बाधमित्यलं पञ्चवितेन ॥

इत्यजन्ता नपुंसकलिङ्गाः ॥

द्यौ द्यः ॥

यत्तु लिट्स्वित्यत्र च्वयो द्वितीया इति प्रवर्तनम-
युक्तम् । चर्त्वस्यासिद्धत्वादिति । तदुदः स्थेत्यत्रोक्तदि-
शोपेक्ष्यम् । यदपि स्वोतेऽर्थे प्रातिशाख्यमुपष्टम्भकसु-
क्तम् । ऊष्मोदयं स्पर्शमेके द्वितीयमाङ्गरपदान्तभाज-
मित्यत्रापदान्तेत्यादि विशेषणं सङ्गच्छत इति तदपि

न लोके तद्विषयत्वात् । कथमन्यथा प्राङ्क्ष
दृत्यत्र तदुपन्यसनं भवतो भवत्विखत्यत्र दृत्तिङ्गत
सङ्गच्छेतेति दिक् ॥

दादेः—।

यत्तु धातोरित्यावर्त्यते तच्चैकमुपदेशकालं ल
यति तेनाधोक् दामलिच्छतेर्दामलिडित्यत्राव्याप्त्यि
व्याप्ती नेति । तद्भाष्यविरुद्धम् । तथाहि भाष्ये अ
गित्यव्याप्तिवारणाय धातोरिति दादेरपेक्षयाऽव
यवषष्ठी तेन धातोरवयवस्य दादेरित्यर्थः । उपदेशे दां
रित्यर्थे तु वैयधिकरण्येनान्वयो मुधैव स्यादिति स्व
मेव । एवं दामलिच्छतेर्दामलिडित्येव भाव्यमि
युक्तमुत्पश्यामः । तथा चैकाचःसूत्र इव वृत्तावपि धा
रिति वैयधिकरण्यमाश्रित्य दकारादेर्धातोरित्यूचुः ।

वाह ऊठ् ।

यत्तु विश्वौह इत्यादौ छन्दस्येव णिवरिति
णिजन्ताद्विजिति केचित् । तन्न । एवं सति णिलो
प्याचः परस्मिन्निति स्थानिवत्त्वेन वाह्यो भत्वाभा
दूठो ऽप्रवृत्तेः । नच क्विपि णिलोपे क्वौ लुप्तं न स्था
न्निवदित्युक्तरूपनिर्वाहः । क्वौ विधिं प्रति न स्थानि

दित्यौत्सर्गिकत्वेन क्वौ लुप्तमित्यस्य सर्वत्र प्रवृत्त्यभावा-
त्। अत एव पिपठिषि ब्राह्मणकुलानीत्यत्र क्वावकार-
लोपस्य स्थानिवत्वान्न नुम् इत्याकरः। पादयतेः
क्विपि तु पदः पदेतिभाष्योदाहरणात् क्वौ लुप्तमि-
त्याश्रीयते। किञ्च क्वौ लुप्तमित्याश्रयणे क्विनिमित्तं
यङादिसंप्रसारणं स्यादित्युक्तरूपमसंभव्येव। न च काम्य-
चः किच्चं कुतो नेति प्रश्ने प्रयोजनाभावादित्युत्तरिते
वाङ्काम्यतीत्यत्र सम्प्रसारणं प्रयोजनं स्यादित्याशङ्कायां
वच्यादिभ्यो यो विहितः कित् तत्र सम्प्रसारणमित्या-
श्रितं तथा च प्रकृतेऽपि तत एव न सम्प्रसारणमिति
वाच्यम्। तथापि वाङ्काम्यतीत्यत्र सम्प्रसारणाभङ्गावा-
रणायाथवा धातोः स्वरूपग्रहण इति समाधाना-
न्तरस्य कैयटोक्तत्वात्तस्य तत्पक्षसंप्रसारणाप्रसङ्गानुद्धा-
रात्। अपि च वच्यादिभ्यो विहित इति धातोः स्वरूप-
ग्रहण इति परिहारद्वयैकरूप्याय प्रकृते क्वौ लुप्तमि-
त्यनाश्रयणमेवोचितत्वम्। अवयाः श्वेतवाः। चकार-
राद्वक्थशा इति प्राचोऽन्येषां च अन्ये दृश्यते। एतच्च
काशिकाद्यनुसारेण। भाष्यतूक्थशस्शब्दस्य सामान्येन
कः सिद्धः न तस्य निपातनं क्रियत इत्युक्तम्। अत
एवोक्थाशा इत्येतदपि सम्बुद्ध्यर्थं निपातनं कर्तव्यं यदि
सन्ने दर्शनमस्तीति कैयटेन यदिशब्दः प्रयुक्तः॥

दिव औत् ।

त उच्चारणार्थं इति केचित् । तन्न तस्य लोप इति सूचनेनानुबन्धानामेकान्तत्वे दिव औत् सर्वादेशः स्यादिति भाष्येण विरोधात् । न चैवं सति स्वरितत्वं स्यात्तच्च पृथिवी उतद्यौरिति लक्ष्यविरुद्धमिति वाच्यम् । व्यत्ययेनोक्तलक्ष्यसिद्धौ भाष्यबलादन्यत्र स्वरितत्वस्येष्टत्वात् । द्योशब्देनापि दिवसमानार्थेनोक्तलक्ष्यसिद्धेश्च । द्यौष्यितरित्यत्र स्वरितपाठस्यौतस्त्वं विनाऽनुपपत्तेश्च । न च प्रत्ययस्वरेण फिट्स्वरेण वा दिव इकारस्योदात्तत्वे ह्रंसनधर्मिणी वस्यानुदात्ते औकारे इकारे यणि उदात्तस्वरितयोरित्युक्तस्वरसिद्धौ किं तित्वेनेति वाच्यम् । औकारेणैकारस्य फिङन्तत्वतत्वविघाते भाविन्यङ्क्तव्यूहपरिभाषया पूर्वं फिट्स्वराप्रवृत्तेरौकारस्यैव फिट्स्वरेणोदात्तत्वावश्यकत्वात् । सर्वनामस्थाने परे पुंसोऽसुङ्पक्षेऽप्यनेनैव न्यायेनासुङन्त एव समासान्तोदात्तत्वं प्रवर्तत इत्यसुङ उदात्तत्वसिद्धिरिति तन्न सूत्रे तैरभ्युपगमाच्च । द्युभिरक्तुभिरित्यादावेवमेव दिव उदात्तत्वाच्च । न हि दिव उत्तित् किं बु तपद् इति दिक् ॥

सौ नौ धातोः।

न च प्रधानत्वेन सिद्धौ प्राचः क्वचित्का झलन्यनुबन्धकमनर्थकेति वाच्यम्। प्रसामः सौ झतनत्वस्य शा-स्त्यर्थकस्य स्वरादिषु पाठाद्व्ययत्वेन लुग्विषयेऽन्तर-ङ्गानपीति लुक्सामान्यमन्तरङ्गस्यापि बाधकं न तु सु-लोपे धात्विति लुगेवेति मते सुपो लोपाप्रवृत्तौ प्रधानत्वाभावान्नत्वं न स्यादिति झलनिमित्तनत्वे सत्य-यत्वेन सुलुक्प्रवृत्तिरिति झलनुबन्धत्वमित्यभिप्राया-त्। न च स्वरादिषु प्रधानपाठसामर्थ्यात् पूर्वं सुलोपा-प्रवृत्तिः। झलनुबन्धस्यैव सिद्धे सामर्थ्यकल्पने गौरवा-तेः। न च लोपं विना लुग्विषयाभावादानुपूर्व्यादेव लोप इति वाच्यम्। एवमपि प्रतिपत्तिगौरवमित्य-भिप्रायात्॥

किमः कः।

त्यदादीदामित्यनुवर्त्तते तेनोपसर्जनस्य न। यच्चा-रम्भसामर्थ्यादिह सूत्रे द्विपर्यन्ता इति नियमत्याग इति तदनवधानात्। नहि त्यदादयो द्विपर्यन्ता इति नियमः। त्यदादीनि वेत्यादौ व्यभिचारात्। किन्त्वत्र द्विपर्यन्ता-नामिति। तथा च वार्त्तिकं त्यदादीनां द्विपर्यन्तानाम-कारवचनमिति॥

न ङिसंबुध्योः ।

यत्तु ङ्यन्तस्य संबुद्ध्यन्तस्य च पदत्वेति व्याख्यानं तूचितम् । एवं हि प्रत्ययलक्षणां सुलभमिति तदर्थं निषेधसामर्थ्यानुसरणक्लेशो न कर्तव्य इति । तन्न छन्दसि संबुद्धेः सुपां सुलुगिति लुकः सत्त्वे तत्रापि निषेधापत्तिः परमे व्योमन्नित्यादौ सुपां सुलुगिति सप्तम्येकवचनस्य पूर्वसवर्णत्वादिध्वति पदत्वेन नलोप प्राप्तो निषिध्यते । ततः संयोगान्तलोपः । एतच्च सुप सुलुगिति सूत्रे प्रकाशे भाष्यादौ च स्पष्टम् । एवं च प्रत्ययलक्षणार्थनिषेधसामर्थ्यानुसरणक्लेशानापत्तिश्च एः च ङावुत्तरपदे प्रतिषेध इति वार्त्तिकमपि नारम्भ णीयं भवतीत्यपरं लाघवम् । प्राचां लुगन्तोदाहरण तु वार्तिककारानुसारेणेति ध्येयम् ॥

ह्रन्तेरत्पूर्वस्य ।

अत्र कुव्यवायच्छन्देषु प्रतिषेधो वक्तव्यः । किं प्रयो जनं छत्रघ्नः खुघ्नः प्राघ्नानि । ह्रन्तेरत्पूर्वस्येत्यत्पूर्वग्रह न कर्तव्यं भवतीत्याकरः । अन्ये तु ह्रन्तेः अत्पूर्वस्येति योगद्वयं तत्राद्येनोपसर्गस्यान्निमित्तात् परस्य ह्रन्तेर्न खो विधीयते । प्रहण्यादित्यादि । द्वितीयेन ह्रन्तेर्न

णो नियम्यते । स च योगविभागसामर्थ्यादनन्तर-
स्येति न्यायं बाधित्वा सर्वोऽपि व्यवहितः कुमति चेत्यादि-
रव्यवहितो हन्तेरिति च । एवं च हृच्चघन इत्यत्र प्राति-
पदिकान्तेति णत्वविकल्पोऽपि न । भाष्यं तु वार्त्तिकाभ्-
युपगमवर्णनमात्रपरं न वस्तुस्थितिः । वार्त्तिकेन सूत्रावयव-
प्रत्याख्यानापेक्षया योगविभागमाश्रित्य वार्त्तिकस्यार्थो-
पसंग्रहस्यैव न्याय्यत्वादित्याहुः । तच्चिन्त्यम् । तथा सति
योगविभागसामर्थ्याद्धवर्वहितं कुमति चेत्येव णो नि-
येत न तु प्रतिपदिकान्तेत्यादिर्मानाभावात् । किं
णादिति तपरत्वं तत्कालावधारणार्थं न वा ।
आद्ये बहुहृच्चहाणीत्यत्र णत्वं न स्यात् । द्वि-
तीये प्राघानीत्यत्रापि स्यात् । यदि तु तपर-
त्वात् प्राघानीत्यत्र न णत्वं एकाजुत्तरपद इत्य-
धिकारसामर्थ्याच्च नित्यत्वे सिद्धेऽतिरिच्यमानं णग्रहणं
नयमेन व्यावर्तितस्यापि विधानार्थमिति बहुहृच्चहा-
णीत्यत्र णत्वम् । बाध्यसामान्यचिन्ताश्रयणाच्च नाद्य-
दोषोऽपीति विभाव्यते । तथापि णग्रहणं स्पष्टार्थ-
मिति तच्चत्यस्वग्रन्थविरोधात् । इह च तत्प्रयोजनानु-
न्यूनत्वात् । अनन्तरस्येति न्यायं बाधित्वेति वदञ्नि-
ष्यविशेषचिन्तायाः एवाश्रयणाच्च । अपि च उपस-
र्गादित्यस्योत्तरत्रानुवृत्तेरत्पूर्वस्येत्यत्रापि सम्बन्धे तद-

पेक्षो नियमः स्यादिति प्रघन इत्यादावेव स्यान्न तु वृत्रघन इत्यादावपि। न च योगविभागवैयर्थ्यं एकयोगत्वे प्रघन इत्यादौ हन्तेरित्यस्येवात्पूर्वग्रहणसामर्थ्यादिष्टसिद्धेरिति वाच्यम्। प्रघनन्तीत्यादिव्यावृत्त्या तत्सार्थक्यादिति दिक्॥

उगिदचाम्—।

नलोपिनोऽञ्चतेरितीह व्याचक्ष्युः। अत्रेदं चिन्त्यम्। उखास्रदित्यादावुगितश्चेति ङीपोऽतिप्रसङ्गवारणायोगिदचामित्यजग्रहणं भेदेन धातोश्चदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमार्थमित्याश्रीयते। अधातुग्रहणं च अधातुभूतपूर्वस्य सुध्यातोरञ्चतिनियमेन नुम्निवृत्तौ प्राग्नायां तद्विध्यर्थं तेन गोमत्यतेर्गोमानिति भवतीत्याकरः। तत्र नलोप्यञ्चतिग्रहणे उक्तनियमोऽपि नलोप्यञ्चतिघटित एव स्यादिति प्राञ्चीत्यादौ ङीबभावाप्रसक्तिः। न च सनकारेञ्चतौ नुमृतदभावयोर्विशेषाभावादञ्चेर्नुम् न। नलोप्यञ्चतिमात्र इत्यभिप्रायेणेह नलोपिन इत्यभिधानमिति वाच्यम्। सनकारस्य नुमि प्रत्यञ्चावित्यादौ नियतनकारनकारश्रुतिर्विशेषस्यासत्त्वात्। यदि तु नश्चापदान्तस्येत्यत्र न इति जातिनिर्देशान्नहस्यैकोऽनुस्वारस्तस्य च परसवर्णो रूपेऽविशेष इति

तदा सूत्राभिप्रायं नलोपिश्चहणमिति । वस्तुतो नपुंसकस्य झलच इति सूत्रे गोमतोल्यादौ झल्लक्षणेनोगिल्लक्षणेन च नुमाऽनुस्वारपरसवर्णयोर्नहयश्रवणमाशङ्क्य न व्यञ्जनपरत्वैकस्यानेकस्य वा भेद इति समाहितं भाष्ये तेनेह व्यक्तिनिर्देश इति गम्यत इति नोक्ताभिप्रायकमिदम् । अयोगवाहानामविशेषेणोपदेशे त्वनुस्वारगरदिनिरमित्ते(?) पूर्वस्यानुस्वार उभयोः परसवर्णो रहयश्रवणं विशेष इति बोध्यम् । विधौ नियमार्थमिति व्यक्तिनिर्देशऽपि । न चोगिदचामित्यत्राज्ग्रहणमावश्यैकमञ्चतिसामान्यघटितनियमार्थमाश्रीयते । द्वितीयं तु सनकारस्याप्यञ्चतिर्नुमप्राप्तौ तन्निवृत्तये नलोप्यञ्चतिपरं नुम्विधौ नियमार्थमिति व्यक्तिनिर्देशऽपि नलोपीत्यावश्यकमिति वाच्यम् । तादृगाकृतिबोधकस्याकारस्यानुपलब्धेरिति ॥

अवर्णस्त्वसावनञः ।

मघवा बहुलम् ।

अत्र वार्त्तिकम् । अर्वणस्तु मघोनश्च न शिष्यं श्छान्दसं हि तत् । मतुव्वन्योर्विधानाच्च छन्दश्युभयदर्शनादिति । अयमर्थः । अर्वणो मघोनश्च देशो न

कर्त्तव्यः । ऋधातोर्विचि गुणेऽरित्यस्मात् मघशब्दाच्च छन्दसीवनिपाविति वनिपि मतुपि चार्वा अर्वन्ता-वितिमघवा मघवानिति च रूपद्वयस्य सिद्धत्वात् । ननवेवं सर्वत्र रूपद्वयप्रसङ्गोऽत आह । दृष्टानुविधिश्छन्दसि भवतीति भाष्यमवतार्य कैयटेन व्याख्यातं भाषाशब्दा अपि नियतविषयाः किं पुनश्छान्दसा इति । एतच्चार्वन्शब्दविषयम् । मघवन्शब्दस्य तु चादेशपक्षेऽपि रूपद्वयस्य सर्वत्र स्वीकारात् । एवञ्चार्वन्शब्दः छान्दस इत्युक्तं भवति । अत एवार्वन्शब्दस्य भाषायामसाधुत्वं कैयटहरदत्ताभ्यामुक्तम् । एवं च ऋधातोर्वनिपि अर्वेति लोकेऽपीति केषांचिदुक्तिः प्रत्युक्ता । प्रत्युक्तं चार्वन्मघवन्शब्दयोर्भाषायामसाधुत्वं अर्वणस्तृ मघोनश्चेति भाष्यादिति हरदत्तोक्तिमनूद्य भाष्यस्य विशेषविषयत्वस्य प्रागेवोक्तत्वादिति तदूषणा मघवन्शब्दविषयभाष्यस्य मघोदात्तमघवन्शब्दविषयत्वेनोक्तेऽप्यर्वन्शब्दविषयस्य विशेषविषयत्वस्यानुक्तेरसम्भवाच्च । तथा च छान्दसेन वनिपा व्युत्पादितस्यार्वन्शब्दस्यैव सौ अनर्वनुशब्दस्यान्यथापि प्रयोग इति व्यवस्था छान्दसत्वप्रयुक्ता । अत एव छन्दस्युभयदर्शनादित्युदाहरणे भाष्योक्तेरमान्यर्वणः पदानीत्यत्र षष्ठ्यन्तार्वन्शब्दप्रयोगो व्यवस्थापनीयः । सत्यपि सूत्रे तस्य

छान्दसत्वेनैव व्यवस्थापनीयत्वेनेतरव्यवस्थायाऽपि तेनैव सिद्धे सूत्रे वैयर्थ्यमिति छान्दसत्वादेर्भावः। मतुपा तु भाषासाधारणेन व्युत्पादितोऽर्वन्शब्दो यथेच्छं स्वादौ प्रयोक्तव्य इति न तु मघोनश्चादेशस्य मतुपा प्रत्याख्यानमनुपपन्नं रूपे स्वरे च वैलक्षण्यात्। तथाहि। चादशपक्षे दीर्घविधौ संयोगान्तलोपस्यासिद्धत्वान्मघवन्निति रूपं मतुपि तु मघवानिति। स्वन्नुक्षन्नित्यादिना निपातितस्य क्सनिप्रत्ययान्तस्य मघवन्शब्दस्य चादेशे वकार उदात्तः। मतुपि ह्रस्वनुड्भ्यामिति प्रातिपदिकस्यापि मतुप उदात्तत्वस्य नगोश्वन्नितिप्रतिषेधाद्वकारोकार इति। अनुपपन्नं च कैयटाद्युक्तं मघोनश्छान्दसत्वं स्वन्नुक्षन्निति नेपातितस्य भाषाविषयत्वे बाधकाभावादिति चेत्। उच्यते वार्त्तिककारीयप्रत्याख्यानानुरोधेन चादेशस्योऽपि बाह्वादीर्घे संयोगान्तलोपो नासिद्ध इति न रूपभेदः। बाह्वादेव च वकारोकार उदात्त इति न स्वरभेदः। नच प्रत्याख्यानानुरोधेन चादेशश्छन्दोमात्रविषय इति कल्पतां तथा च मतुप्यपि छन्दसि बाह्वं छन्दसीति दीर्घाभावस्वरव्यत्ययाभ्यां चादेशसमानरूपस्वरं मघवन्शब्देन कुतो न कल्प्यत इति वाच्यम्। भाषासाधारण्येन प्रतीयमानस्य चादेशस्य मतुपा भाषासाधारणेन प्रत्याख्याने छान्दसत्वकल्पनाया गौर-

वग्रस्तत्वात् । बाहुलकाश्रयणस्यावयोः समानत्वात् । च बाहुलकाश्रयणेऽपि आदेशानुरोधेन मतुवन्त ए रूपस्वरकल्पनाऽस्त्विति वाच्यम् । यथोत्तरं मुनीन प्रामाण्यमिति वार्तिकस्वरसानुरोधेन सौत्रादेशप एव बाहुलकाश्रयणमित्यादरस्य युक्तत्वात् । अत एव ह न्हसीवनिपौ चेति वार्त्तिके मघमस्यास्तीति मघवा बहुलमित्येतन्न कर्त्तव्यं श्वन्नुक्षन्निति निपातनान्मघ शब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वादिं कैयटोऽपि संगच्छते । अन्यथा भाषायां शब्दद्वयसि कथनस्य प्रकृतानुपयोगापत्तेः । मघोनश्छान्दसत्व भिधानं तु वनिवन्तमघवन्शब्दाभिप्रायमिति स निरवद्यम् । अचेदं निर्गलितम् । मघवन् शब्दोऽन दात्तो भाषासाधारणः । वनिवन्तमध्योदात्तश्छान्दसः मघवन्शब्दो मध्योदात्तो भाषासाधारण इति ॥

पथिमथि—।

यत्तु ननु गुणा अभेदका इति पक्षे सूचेऽनुनासि कोच्चारणे ऽप्यान्तरतम्यादनुनासिकः स्यादित्याशङ्क ह । आ आदित्युक्का गुणानामभेदकत्वेऽपि शुद्धैक तेः सूत्रे निर्देशान्नातिप्रसङ्ग इति त्वसङ्गतम् । अभेदव दोषस्य दुरुद्धरत्वात् एका व्यक्तिर्यैश्चत इत्युक्त्या

व्यत्ययलरं न निर्दिष्टमित्यर्थः फलितः स च गुणनां भेद-कत्वे सत्येव संगच्छते नान्यथेति । तत्तुरगारूढस्य तुर-गविस्मरणमनुसरति इति ॥

इतोऽत्—।

अनेत इति तपरत्वं पन्थानमिच्छति पथीयति अ-स्मात् क्विप्यल्लोपयलोपयोः स्वादौ पन्थाः पन्थियावित्या-दिरूपेऽत्वाभावार्थमिति केचित् । तन्न । पथिमथ्यृभु-क्षामादित्यात्वे सुब्विधौ नलोपस्यासिद्धत्वेन नस्यात्वे सौ पन्थया इति रूपं स्यादिति कथं पन्था इत्युक्तिरिति तावच्चिन्तनीयम् । न च बहिरङ्गपरिभाषया ऽत्वस्या-सिद्धत्वान्नलोपप्रवृत्तिरिति वाच्यम्। एवं बहिरङ्गपरि-भाषया पूर्वत्रासिद्धमित्यस्य बाधे ॥

"शुष्किका शुष्कजङ्घा च क्षामिमानौजठत्तथा ।
मतौ वत्वे झलो जश्त्वे शुष्कलिरामान्निदर्शनम् ॥"

इति पूर्वत्रासिद्धे वचनप्रयोजनस्यासिद्धिप्रसङ्गा-त् । किञ्च अल्लोपस्य स्थानिवत्वात् न्यादेशाप्रवृत्तौ पन्थियावित्याद्यपि चिन्त्यम् । न च क्वौ लुप्तं न स्या-निवदित्यल्लोपस्य स्थानिवत्वाभावः । क्वौ विधिं प्रतीत्यस्यैवोत्सर्गत आश्रयणात् । न तु क्वौ लुप्त-मित्यस्य । तस्य क्वचिदेव सखेः सुतीरित्यादौ यण-

द्यप्रवृत्तये आश्रयणात् । अभ्युपगतं चेदं दीधीवेवीटामित्यत्र पिपठिषीत्यादिसिद्धये कैयटेन । न चेत इति तपरकरणादिहापि क्रौ लुप्तमित्यस्याश्रयणां ह्रस्वेन तकारस्योच्चारणार्थत्वाश्रयणात् । आचारक्विप्यनुनासिकस्य क्विझलोरितिदीर्घे नामधातौ भवदुदाहृते ततः कर्तरि क्विपि प्रथीनित्यत्र तत्सार्थक्याच्च । वस्तुतः शाविति नियमादिह न दीर्घ इति तच्च वक्ष्यते । अत एव प्रकाशेऽचैव इति सूत्रे ङकारान्ता एवैताः प्रवृत्तय इति कौमारमते आचारक्विबन्तात्तिप्रशपोर्लंघूपधगुणो प्रथेनतीत्यादि न स्यादिति पण्डितचरणाः । तस्मात् पथीः पथ्याविति प्रकाशोक्तमेव साधु । दृत्वं श्रुत्वं भृज्जाविति प्राञ्चः । न च श्रुत्वे दृत्वमसिद्धमिति पूर्वं श्रुत्वं पुनर्दृत्वमिति वक्तुं युक्तम् । भलां जश् झशीति निर्देशेन शश्च न जश्त्वमिति ज्ञापनेन भृज्जतीति निर्देशोपपादनाय दृत्वश्रुत्वक्रमाव-श्यकत्वेन श्रुत्वे दृत्वं नासिद्धमिति कल्पनात् । एतच्चैकयोगनिर्दिष्टानामित्यत्र सीरदेवेष्टौ स्पष्टम् । त्वमहमित्यत्र शेषे लोपोदाहरणे त्वमतो गुण इति परूपोदाहरणं केषाञ्चिदसङ्गतम् । परूपस्यान्तरङ्गत्वेन पूर्वं प्रवृत्तत्वात् । स्वपरग्रन्थविरोधाच्च ॥

साम—।

गौणतायां सुडभावान्नायमिति केचिदिति मूलमुपादाय साम इति यद्यपि सुड्ग्रहणं न स्थानिविशेषणं बाधात्तथाप्युपलक्षणं तु भवतीत्यादिनोक्तिसम्भवस्तन्मतस्य प्रकाशे स्पष्टः । तत्र केचिदित्यस्यरणे भाष्यादिविरोधः अत एव प्रकाशः । तथा च भाष्ये साक्षादुदाहृतमतित्वाकमतिमाकमितीति । एवञ्चैतद्दूषणायासः केषाञ्चिन्मुधैवेति बोध्यम् ॥

युस्मदस्मदोः षष्ठी—।

इच्छापादादौ किम् । युष्मान् रक्षतु गोविन्दोऽस्मान् कृष्णः सर्वदावत्विति प्राञ्चः । वैदैरशेषैः संवेद्योऽस्मानित्याद्यन्ये । तदुभयं चिन्त्यम् । गोविन्दोऽस्मानित्यादौ संध्यभावेऽस्मानित्यादेर्नवाक्षरत्वेनानुष्टुप्पादत्वाभावेन सन्धौ चौभयत आश्रयणे नान्त्यादिवदित्यस्मदोऽभावेन कथमिदं प्रत्युदाहरणमिति । तस्माद्युष्मदस्मदोर्व्यत्ययेन पाठे सर्वदेत्यत्र च सदेति पाठे युष्मदस्मदुदाहरणमिति बोध्यम् । अतएव ॥

"रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।

स एव नाथो भगवानस्माकं मधुसूदनः ॥"
इति काशिकायामुदाहृतम् । प्राचामुक्तावेकवाक्यपदात् परत्वाभावस्तु नाशङ्क्यः । गोविन्दो युष्मानस्मान् रक्षत्वित्येकवाक्यत्वात् । कृष्ण इत्यादेश्च पदादित्वसंपादकत्वात् ॥

पक्षद्वय-।

यत्तु दर्शनमिह ज्ञानमात्रमदर्शनं लोपइत्यत्र यथेति तन्न । अग्निचिदादौ क्विपादिनां लोपेऽपि ज्ञानस्य सत्वाद्दर्शनमित्यत्र दर्शनशब्देन ज्ञानमात्रग्रहणायोगादिति ॥

सपूर्वपक्षः-।

यत्तु हरिस्त्वां त्रायते स मामित्यत्र चायत इति क्रियानुषङ्गाभ्युपगमेऽप्येकतिङ्वाक्यमिति परिभाषितैकत्वानपायादिति किंचित् । तच्चिन्त्यम् । तथा सत्यं दण्डो हरानेनेत्यत्राख्तीति गम्यमानक्रियया दण्डस्य पृथगन्वयेऽप्युक्तपरिभाषितैकवाक्यत्वानपायाद्धरेत्यस्य तिङ्न्तिङ इति निघाताप्तेः ॥

चौ।

यत्तु लुप्ताकारनकार इति तत्राकारलोपेन नका-

रलोपस्यासिद्धत्वात्तत्क्षयनं व्यर्थम् । सुट्डित्यत्र ब्रश्चेति षत्वं स्कोरिति सलोप इत्यसङ्गतम् । सलोपं प्रति षत्वस्यासिद्धत्वात् पूर्वं सलोपस्योदाहर्तुमुचितत्वात् ॥

वसाः सम्प्रसारणम् ।

यत्तु च्छान्दसा अपि क्वचिद्भाषायां भवन्तीति मासस्कन्दसीति सामान्यापेक्षज्ञापकमाश्रित्य जग्मुषः तस्थिवांसमित्यादौ भाषायां क्वसुरुपपादनीय इति तन्न । पदन्न इति सूत्रे भाषासाधारणमिति व्याख्यानस्य प्राबल्योपवर्णनेन मासस्कन्दसीत्यस्याज्ञापकत्वात् । तस्मादुतक्वस्वर्थं उश्नुवीरिति श्नुग्रहणं सामान्यापेक्षं ज्ञापकमाश्रयणीयम् ॥

इति हलन्ताः पुंल्लिङ्गाः ।

नहो धः ।

यत्तु द इत्येव नोतं सन्नद्धमित्यत्र रद्धाभ्यामिति नत्वापत्तेः । ऋषस्तथोरित्यनापत्तेश्चेति । तच्चिन्त्यम् । दो दद्धोरित्यत्र स्वयं स्वीकृतदान्तपक्ष इव संनिपातपरिभाषया नत्वानापत्तेः । धग्रहणस्य श्रवणार्थत्वे नैवावश्यकत्वाच्छङ्काया निर्मूलत्वापत्तेः । उत्तरे एतदनुक्तौ न्यूनं-

त्वाच्च । न हि भवन्मते झषस्तथोरिति कृते जश्त्वं हु
झलुक्परिभाषाविरोधात् । यदि तु प्रकृतसूत्रादि
ष्टया नत्वादेरसिद्धत्वेन तद्दृष्ट्या संनिपातविघाता
वात् परिभाषाया अप्रवृत्तिरत एव जग्धमित्यादौ स
पातेन जग्ध्यादेशे तन्निमित्तं तस्य धत्वम् । अत एवेकोय
चीत्यनन्तरं मय उञो वेत्येव सिद्धे यथास्थितस्त्रं कि
मित्यादौ वत्वस्यासिद्धत्वद्वारा ऽनुस्वाराभावार्थमि
कारः । अन्यथेको यणचीत्यनन्तरं पाठेऽप्युक्तपरिभा
ऽनुस्वाराभावसिद्धेरलग्नतापत्तिः । अत एव हो ढ
रित्यत्र ढान्तधान्तपक्षौ दर्शितौ भाष्ये । अत एव
स्यङ्ग्यासैङ्गामित्यादौ जश्त्वाद्युपन्यस्तं माधवादिरी
र्विभाव्यते विभाव्यतां नाम नञ्चैतावता पूर्वापरस्व
न्यविरोधः परिहर्तुं शक्यः इति दिक् ॥

इति हलन्ताः स्त्रीलिङ्गाः ।

यत्तु विमलद्युशब्देऽझलन्तत्वान्न नुमित्युदाह
वाःशब्दे तदुपन्यसनं तदनवधानात् । विश्वसृड्
प्रतिविधेयमिति प्रक्रिया । तत्रादिना क्विब्वेडुपयडादि
प्रतिविधानं च काश्यच्सूत्रे सृजिदृशोरिति सूत्रे चो
ट्टकाम्यति रज्जुसृड्भ्यामितिभाष्यप्रयोगात् कत्ववि
धत्वमभ्युपगम्यत इति । यत्तु ब्रह्मादिसूत्रे सृजियज

पदान्ते षत्वं कुत्वापवाद इति स्वृत्विजोस्तु निपातना-
देव कुत्वमस्यनछन्दस्त्वव्यतेरौणादिके क्विन्प्रत्यये बोध्य
इति क्विन्प्रत्ययस्येति प्रत्ययग्रहणप्रयोजनत्वेन भाष्य-
कृदुपन्यस्तस्य मानोऽस्मिंत्यत्र स्मेः कुत्वस्यैवं सत्यनु-
पपत्तिः । पदान्तत्वाभावे अत्यस्त्वाजीत्यादौ साव-
काशस्य कुत्वापवादत्वाभावाच्च । न च पदान्ते षत्वप्र-
वादः ष्ठ्यक्षादिशब्दस्वाभावात् । न च कुत्वस्यासिद्धत्वात्
षत्वमिति वाच्यम् । स्मृदृशुगादिष्वपि षत्वापत्तेः ॥
प्रत्ययग्रहणसामर्थ्यात्तत्र क्विपि तस्य जश्शि वस्य कुत्वमि-
ति तु प्रकृतेऽपि समानम् । स्वृत्विजोर्निपातनात् कुत्व-
मिति तु प्रकृतेऽपि समानम् । स्वृत्विजोर्निपातनात्
कुत्वस्त्रीकारेऽप्रकृते तदापत्तेः । पदान्ते प्राप्तस्य
कुत्वस्य येन बाधे प्राप्ते कुत्वप्रतिषेधमात्रसंज्ञेन नि-
पातेन इति पदान्तमात्रविषयं कुत्वमिति चेन्न । तस्य-
न्नियोगेन निपातितस्य स्वगित्यनागमस्यापि पदान्तवि-
षयतापत्तेः । सन्नियोगपरिभाषाविरुद्धं किञ्चित् पदा-
न्तविषयं किञ्चित्सर्वविजयमिति तद्युक्तिं विनाऽभ्युपग-
न्तुमशक्यमिति ॥

इति हलन्तनपुंसकलिङ्गप्रकरणम् ।

स्वरादेर्वधकोन्तोदात्तत्वं काण्विकायामुक्तमः ऋधगित्यादिस्वरव्यविरोधादिति केचित् । ऋधव् मरुत्वत्य इत्यादावन्तोदात्तस्यापि ऋधः पाठाद् र्गिकमन्तोदात्तत्वमङ्गीकृत्य व्यत्ययेन क्वचिदाद्युदा त्वकल्पनात् काण्विकोक्तान्तोदात्तत्वसामञ्जस्यात् । माङ्नमोः स्वरादिषु पाठः सत्ववचनत्वेऽप्यव्ययस्य इत्यत्र लक्ष्मीवाचकस्य माशब्दस्याव्ययत्वापत्तिर्दूषणं तद्भसात् । तस्य माङ्त्वाभावात् ॥

कृन्मेजन्तः ।

पिबध्या इत्यत्र कर्त्तरि ग्बिति तद्भसात् । व्यधकृतो भाव इति सिद्धान्तादिति केचित् । तन्न नवबोधात् । तच्च हि कर्त्तरि ग्बिति सूत्रोक्तं तथा च यकि प्राप्ते व्यत्ययेन ग्बिति तेषां भाव स्वयैव परभाषनुक्तन्यूनतेति दिक् ॥

इत्यव्ययानि ।

वनो र च ।

यत्तु वन्नन्तात्तद्धिताश्चेति व्याख्यातम् । तच्च वन्नः दिति व्यर्थं व्यपदेशिवद्भावेन वन्नन्तान्तादित्यत वन्नन्तस्यापि ङीषन्तस्य । व्यपदेशिवद्भावो ऽ

तिप्रदिकेनेत्याश्रयणे टिड्ढाद्यिसूत्रेऽपि तथा वाच्यं स्यात्। तदप्तविधिसङ्गावादसम्भवयुक्तिकं च। अन्यत्र स्वयं तथा व्याख्यानेन विरुद्धं च॥

प्रत्यय—।

ननु निर्दिष्टपरिभाषया आपोऽव्यवहितपूर्वस्यात इत्यर्थलाभात् सर्विकेत्यादावसंभवः। न च वचनसामर्थ्यादिह ककारातिरिक्तेनाव्यवधानमाश्रीयत इति वाच्यम्। कात्पूर्वस्य व्यवहितसाधारणाश्रयणेन वचनसामर्थ्यादिश्विकेत्यादावेकादेशात् पूर्वं भवति इत्वमिति कल्पनयापि संभवादिति चेन्न। न यासयोरिति ज्ञापकान्न चेत्युक्तकल्पनयैवोचितत्वादिति॥

त्यक्त्यपाइत्र।

इह कौमुद्यां दक्षिणस्यां जाता दाक्षिणात्येत्युक्तं तन्न विग्रहवाक्यं किन्तु अर्थकथनम्। त्यग्विधावव्ययसाहचर्यादाजन्तदाक्षिणाशब्दात्त्यग्विधानादिति बोध्यम्॥

यञश्च।

यत्त्वकारलोपे कृते हलन्तस्य हल उत्तरस्य तद्धितयकारस्यापधाभूतस्येति कैश्चिदुक्तम्। तत्र उप-

धात्मूतस्येति व्यर्थम् । न च यस्येतिलोपस्याभीय-
स्वेनासिद्धत्वादीत्वस्य ह्रस्व उत्तरस्य तस्याभावात्तदर्थं
तदिति वाच्यम् । वचनसामर्थ्येनाङ्गोपधालोपस्यासिद्धत्वाभा-
वात् । कथमन्यथा आगस्त्यस्येत्यङ्गोपधात्मूतस्येति तैर्नानु-
वर्त्तितम् । किञ्चैवं सत्यलोपे ह्रते ह्रस्वस्येति किम-
र्थमुदाहृतम् । न ह्युपधालोपस्याङ्गोपधेक्षा प्र-
त्युत परत्वादुपधालोप एव प्रागुदाहर्तुमु-
चितः । नन्वनयोः परस्परमसिद्धत्वेन प्रागुदाहरणे
कामचारः त्रिप्रतिषेधस्य आभीयासिद्धत्वे जनसन-
खनामिति सूत्रे भाष्यकृता सिद्धान्तितत्वात् ॥

काण्डान्तात् ।

यत्विह द्विकाण्डेत्यत्र ह्रयसचो लुगित्यनूद्य प्रथमश्च
द्वितीयश्च अर्ध्यमाने मतौ ममेति सिद्धान्तादुक्तमि-
ति । तत्तुह्रयस्याङ्गस्येति च सूत्रे ह्रयङ्गुल्लमित्यत्र द्वि-
गोर्नित्यमिति ह्रयसचो लुगिति । तत्तत्तद्ग्रन्थविरो-
धादुपेक्ष्यम् । अन्यत्तु प्रक्रियाप्रदीपादवधेयम् ॥

पुरुषात् प्रमाणे-।

द्विगुणतद्धितार्थेत्यत्र पञ्चमीनिर्देशात्तदन्ता-
देव गुणित्यनूद्योक्तमूह्य आगस्त्यकौण्डिन्याभ्यामस्रि-

ष्टत्वादिदमयुक्तमिति केचित् । तन्न । एवे चानियोग इत्यत्रोक्तरीत्या ष्टत्तिस्थवचनान्तरेण तदर्थात् । उक्तसूत्रे हि द्विगोर्नित्यं लुगिति वृत्तौ पठ्यते । व्याख्यातं च हरदत्तेन अप्राप्त एवाच लुम्विधीयत इति । यदपि पुरुषात् प्रमाणे इति सूत्रे द्विगोरलङ्ग्रितलुकीत्यनुवर्त्तते तत्सामर्थ्याल्लुगपि आक्षिप्यत इति तदपि पुरुषहस्तिभ्यामिति सूत्रे निराकरिष्यामः ॥

केवलमामक—।

अवरीभ्यो मथवेत्यत्रावरीशब्दे द्वितीयो वर्णो दन्त्योष्ठ्यो न पवर्ग्य इति हरदत्तः । तचापरीभ्य इति सांप्रदायिकपाठादिदं चिन्त्यमिति केचित् । अचेयं चिन्ता । अपरशब्दः स्वाङ्गशिटामित्याद्युदात्तः तस्मात् ङीपि सिद्धो अपरीशब्द आद्युदात्तः स्यात् पठ्यमानश्चान्तोदात्तः । स च कथंचिद्बाहुलकादिना ङीपा साधनीय इति न प्रकृतोदाहरणं किन्तु शाखान्तरस्थमाद्युदात्तं तच्च दन्त्योष्ठ्याद्वितीयवर्णमिति न संप्रदायविरोध इति सहृदयैराकलनीयम् ॥

वर्णादनुदात्तात्—।

अनुपसर्जनादित्यनुवृत्तं टिदादीनामिव वर्णाच्च

विशेषणं न तु प्रातिपदिकस्य वैयर्थ्यापत्तेः। विभा सपूर्वस्येत्यत्र इत्यादौ तथा व्याख्यातत्वाच्च। चेयणा शलल्येति ग्रह्यम्। चिषु स्थानेषु एणी च्येणीति व्याख्यम्। पूर्वपदात् संज्ञायामिति च्छान्दसं वा णत्वम् नारायणवृत्तिस्थं चीयणेतान्यस्या इत्यादि वाक्यं तु न ग्रहः किन्तु तात्पर्यकथनम्। एवं च यथाश्रुतदृग्रन्थ बलादिहानुपसर्जनग्रहणं प्रातिपदिकविशेषणमि केषाञ्चिल्लेखो निर्मूल इति ध्येयम्॥

अन्यतो ङीष्।

यत्तु कृष्णकपिलेत्यत्र कृषेश्चेति न प्रत्ययं कषेति सौत्राद्धातोरिलजिति कैश्चिदुक्तं तदुणादौ स्वयमुदा हृतेन कृषिर्वर्णे इति नक्प्रत्ययेन कर्मेः पश्चेति वा मृधातुना च विरुद्धम्॥

षिद्गौरादिभ्यश्च।

श्वानमाचष्टे स्वेवाचरतीति वार्थे णिचः क्विपो वा कर्त्तरि क्विप् तदोपसर्जनत्वात् ङीवभावे निःशुनीत्यादि वदन् ङीपि शुनीति प्रकाशः। तच्च णिचि संप्रसारणटिलोपयोरुक्तरूपं दुर्लभमिति केचित्। तच्चिन्त्यम्। अत्रत्यकौस्तुभग्रन्थविरोधात्। प्रक्षल्येकाजिति प्रकृति-

वाट्टिलोपासम्भवाच्च । न च येननाप्राप्तिन्यायेनन्तरङ्गेति न्यायेन च टेरित्यस्यैव बाधान्नस्त इति टिलोपापत्तिर्दुर्वारैवेति वाच्यम् । णाष्ठन्नित्यनेन नस्तद्धित इत्यस्यानतिदेशात् । इष्ठनि [कार्यं तदतिदिश्यते । न च इष्ठनि नस्तद्धित न क्वचिद् दृष्टम् । अन्तिष्ठ इत्यादौ तु परत्वाट्टेरियैव प्रवृत्तेन तस्य नामधातौ साधवादिभिरुक्तत्वात् । ान्तरे तु पक्षान्तराभिधानमिति अत्रानुनासिकेति श्रुतो नेत्यादिरन्यदेतत् ॥

जानपद—।

इह नीलगुणविशिष्टवचनो नीलशब्दो नतु तेन मित्यधिकारे नील्याऽनित्यन्नन्तः अत्र श्रुति ङीपः प्रकृतित्वेन गुणप्रवृत्तिनिमित्तकस्य प्रथमसुपस्थितमादायैव लक्षणस्य चरितार्थत्वात् । एवं यत्कैश्चिन्नित्यनाच्छादनं चेत् नीलाऽन्येति प्रत्युदाहृत्य नील्या ा घाटीत्यर्थः नील्या अन् वक्तव्य इत्युक्तम् । तदनवनात् । न ह्यन्नन्ता प्रकृतिर्येन तदुदाहरणमर्थवत् यथा नील्या रक्ता गोनीली प्रसज्येत । न चेष्टाः । उक्तन्यायविरोधात् ॥

पुंयोगादाख्यायाम् ।

यत्तु गोपालिकेत्यादिसिद्धये पालकान्नेति कश्चित्पठति । तन्न । निषेधं विना टाबभावे पालकान्त्वासम्भवात् ॥

इन्द्रवरुण—।

पूर्वसूत्रे केकयीत्यादिसिद्ध्यर्थं यथाकथञ्चित् पुंयोगो ङीषो निमित्तम् । न तु दम्पतिभाव एवेति सिद्धान्तितत्वात्तेनैव ङीषि सिद्धे आनुको नियमार्थं यवनाल्लिप्यामिति वार्तिकम्। दम्पतिभाव एवेति पक्षेऽपि लिपिगतपुंयोगेन लिपौ वर्तमानाद्यवनशब्दादनेन ङीष्यपि विधीयते । एवञ्च तस्येदमित्यणो बाधकं ङीषिति कैयटप्रभृतयश्चिन्त्याः । अर्यक्षत्रियाभ्यां वा स्वार्थे । क्वचित्वार्येत्यादिपाठो भाष्यकैयटवृत्तिपदमञ्जर्यादिपुस्तकेषु दृश्यते । तत्र ऋधातावर्यः स्वामिवैश्ययोरित्युदाहृत्याऽन्यत्र ण्यत् आर्य इत्युक्त्वा आर्यक्षत्रियाभ्यामित्यानुगङीषावुदाहरन्माधवोऽनुकूलः अर्याणीत्यमरस्त्वार्याणीत्येव पठितुं शक्यः । क्वचित्तथैवोपलभ्यत इति न प्रतिकूलः । तत्रार्यः स्वामिवैश्ययोरित्युदाहरन्ती तट्टीका त्वर्यपाठे अनुकूलेति

यं पुनर्विपश्चितः प्रष्टव्याः । अचानुग् ह्रस्वादिरेव भवाद्वक्तव्य इति हरदत्तः । अत्र किंचिदनुक्ति कृते रूपप्रसङ्गः । न चाकारोच्चारणसामर्थ्यात् तद्बाधेन गङ्गोपोऽन इत्यस्य बाधेन चारितार्थ्यादिति । तन्न । तरङ्गपररूपचारितार्थ्ये बहिरङ्गाङ्गोपबाधनार्थत्वाल्पनात् । विनिगमनाविरहेऽपि पररूपबाधकत्वस्यायकत्वाच्च । न चाङ्गोपबाधनार्थं तवाप्यावश्यकम् । त्यथा वार्णादाङ्गं बलीय इति न्यायेन पररूपात् गङ्गोपस्यैव प्राप्तेः पररूपाप्राप्तौ तद्बाधकत्वाच्यास्वात् । तथा चावश्यकत्वादङ्गोपबाधनार्थत्वमेवाति वाच्यम् । भिन्नाश्रयत्वेन ह्योन इत्यादाविव र्णादाङ्गमित्यस्येहानुपस्थितेः । नुकाङ्गोपोऽन इत्यप्रतिपदोक्तत्वाभावादप्राप्तेश्चेति दिक् ॥

स्वाङ्गाच्चोपसर्जनात् - ।

यत्तूपसर्जनव्यावर्त्यं शोभना शिखा सुशिखेति तंिन्त्यम् । सुपाणिनिरित्यर्थादत इत्यत एवैतद्व्यावृत्तेः ॥

सख्यशिश्वी - ।

इतिशब्दः प्रकारे स च भाषायामिलक्ष्यान-

न्तरं द्रष्टव्यः । तेन क्वचिच्छन्दस्यपि । आधेनवो धुनय-न्तामश्विभ्वीरिति केचित् । तच्चैतौ ङीषन्तौ निपा-त्यत इति वृत्तिदर्शनादुदात्तः । वेदे त्वाद्युदात्तपाठात् कथमनेन सिद्धिः । अत एव वेदभाष्ये सख्यशि-श्वीति ङीषमुदाहृत्य एतदस्वरेण शिशुशब्दाच्छ-न्दसीवनिपाविति मत्वर्थीये ईप्रत्यये ततो नञ्समासे चाचाशिश्वीति साधितम् । तत्र ईप्रत्यये ओर्गुणाभा-वस्त्वयस्मयादित्वाच्छान्दस इति तस्य भावः । तस्माच्छ-न्त्यमेतत् । सखी सदा परिभावेति हरदत्तोदाहरणमनवद्यम् ॥

जातेः ।

यत्तु गोत्रं च चरणैः सहेत्यत्र गोत्रशब्दमपत्यप्र-त्ययान्तपरं व्याख्यायौपगवीत्युदाहृतम् । यच्च व्याख्यायामणन्तङीपं परत्वादयं बाधत इत्यादि । तत्कौरव्येति सूत्रे ढक् च मण्डूकादिति अपत्या-णन्तान्मण्डूकशब्दाङ्ङीषोऽपवाद इत्यर्थकत्वग्रन्थवि-रुद्धम् । भाष्यादिविरुद्धं चेति तस्यापत्यमिति सूत्रे व्यु-त्पादयिष्यामः ॥

ऊङुतः ।

यत्तु लिङ्गविशिष्टपरिभाषया स्वादयः । प्राचा

तु आदिवङ्गावात् स्वादय इत्युक्तम् । तचेदं वक्तव्यम् । परं प्रत्यादिवङ्गावो विधीयते । तथा च ङ्याप्प्रत्यय इति प्रतिषेध एव स्यान्न तु स्वादय इति । तदनवधानात् । आदिवत्वेन ङ्याङ्त्वे लिङ्गविशिष्टपरिभाषया स्वादयः । लिङ्गबोधकप्रत्ययान्तमेव हि लिङ्गविशिष्टमिति इत्यादौ स्थितम् । स्वस्यैव परं तदनाश्रयणे उक्तपरिभाषोपन्यासोऽसंगतः स्यादिति सुधीभिर्भाव्यम् ॥

संहित-।

शप्तौ खुरौ ताविव संश्लिष्टत्वादुपचारात् संहितोरुः सैव शप्तोरूरिति । केचित् । तथा सति उरूत्तरपदादौपम्य इत्यत एव सिद्धत्वादिह शप्तग्रहणवैयर्थ्यापत्तेः । तस्माच्छप्तशब्दः संहितमर्थाय इति हरदत्तोक्तिरेव साधुरिति ध्येयम् ॥

शार्ङ्गरवाद्यञो ङीन्।

ङ्याङ्नदीरिति गणसूत्रम् । तचात इत्यनुवृत्त्या नरान्त्याकारलोपेनापहारात् सामर्थ्यात्तदाद्यकारस्य ङ्याङ्निः । यत्तु नारि रान्तं लुप्ताकारानुकरणं नरः अः नरः ना च नरश्च तयोरिति व्याख्यानम् । नरशब्दस्य

जातिवाचिन इह ग्रहणाभावे कथं तस्मान् ङीन्। न च जातेरिति स्त्रियामिति चाधिकारान्नरित्यस्य जाते स्त्रियां वृत्तेस्तद्घटितान्नरशब्दादेव ङीनिति वाच्यम् तथा सति वानरादिशब्देऽपि ङीन्दृष्ट्योः प्रसङ्गात् न चायं समुदायोऽवयवेन व्यभिचरतीति न्यायेन वानरादिव्यावृत्तिः। अकारविशेषणनरि तस्य ङीनि प्रकृतित्वेनान्वयाय पृथगनुसन्धानस्य क्लिष्टत्वात् उक्तरीत्यानुपपत्तिपरिहारस्य सुसाधत्वाच्चेति विभावनीयम्। अत्र पुत्रशब्दः प्रत्यते। तेन पुत्रीव हर्षं हृदये तनोतीत्यादिसिद्धिः। अत एव वा सूतकापुत्रकाहन्द्रारकाणामिति प्रत्ययस्थादिति सूत्रस्थवार्त्तिके पुत्रिकाशब्दे ङीन इवर्णस्य पत्वेऽकारविधानार्थं वा अ इति प्रश्लेषः। अन्यत्र नित्यत्वबाधनाय पत्वेऽकार इति आकरः। एवं सति कारे सत्यागरस्यति सूत्रे सूतोग्रराजभाजकुलमेरुभ्यो दुहितृपुत्रड्वेति वार्त्तिकं व्यर्थमिति केचित्तन्न। नादिन्याक्रोशे पुत्रस्येत्यत्राभिव्यक्तपदार्था ये इति न्यायेन प्रसिद्धपुत्रग्रहणे लिङ्गविशिष्टपरिभाषया ङीनन्तस्यापि ग्रहणमिति स्थिते ङीनन्तेन सूतपुत्र्यादिसाधने सूतपुत्र्यादिनीत्यादौ नादिनीति ह्रस्वनिषेधः स्यात् स मा भूदिति सतीग्रेति वार्त्तिकारम्भादिति। किं च

पुत्रः पुंस्य इति पुंवाचकेभ्यः परस्योत्तरपदस्य पुत्रस्याद्युदात्तो विधीयते । स च ङीनन्तपुत्रीशब्देन भूतादीनां समासेऽप्युक्तन्यायेन भवति । न भवति दुहितुः पुत्रडादेश इति स्वरभेदोऽपि वार्त्तिकप्रयोजनम् । अत एवोक्तं प्रक्रियाप्रकाशे । स्वरे विशेष इति । ननु यद्यपि राजपुत्रीत्यत्र नाचार्यराजेत्युत्तरपदाद्युदात्तत्वे पुत्रडादेश इति पक्षे उदात्तनिवृत्तिस्वरेणाऽपि उदात्तत्वे च विशेषाभाव इति वार्त्तिके राजशब्दो नैतत्प्रयोजनकस्तथापि तत्रोक्त एव प्रयोजन इति मन्तव्यम् । किंच निरनुबन्धकपरिभाषयोक्तसूत्रयोः प्रसिद्धपुत्रशब्दग्रहणं न त्वादेशपुत्रडग्रहणमित्युक्तप्रयोजनं स्पष्टमेवेति ॥

इति स्त्रीप्रत्ययाः ।

प्रातिपदिकार्थ—।

अत्र परिमाणं प्रातिपदिकार्थः तत्र च प्रत्ययार्थभेदेन प्रकारस्तद्धितार्थदेवताद्यभिव तेन द्रोणो व्रीहिरित्यत्र द्रोणाभिन्नपरिमाणपरिच्छिन्नो व्रीहिरित्यर्थ इति केचित् । तन्न । द्रोणं व्रीहिमानयेत्यादि-

दाविवेहापि द्रोणपदस्य तत्परिमितलक्षणयैवोपप
प्रथमायाः परिमाणार्थत्वे मानाभावात् । न च
परिमाणग्रहणं व्यर्थमिति वाच्यम् । द्रोणपरिमित
लक्षणायां परिमिताद्यंशस्य नियतोपस्थित्यभा
प्रातिपदिकार्थत्वाभावात् । तन्मात्रे विधीयमाना प्र
मा न स्यादिति परिमाणमात्राधिक्ये प्रथमाविधा
तत्सार्थक्यात् । न च गौर्वाह्लीक इत्यत्र मुख्यार्थ
गोशब्दात् प्रथमोत्पत्तौ वाह्लीकसामानाधिकरण्ये सह
लक्षणायामपि कृतायाः प्रथमाया इव प्रकृतेऽपि द्रो
शब्दोत्तरप्रथमाया अपि व्रीहिसामानाधिकरण्ये द्रो
शब्दलक्षणायामप्यनिवर्त्तनमिति किं परिमाणोक्त्यै
वाच्यम् । एवं रीत्या परिमाणग्रहणस्य हरदत्तादि
प्रत्याख्यातत्वात् । न चोक्तविषयिताशाली बो
लक्षणयोपपादयितुमशक्य इति परिमाणे प्रथमाविध
नमावश्यकमिति वाच्यम् । द्रोणो व्रीहिरिति वाक्य
त्तरपरिच्छेद्यत्वसम्बन्धेन द्रोणरूपपरिमाणप्रकार
व्रीहिविशेष्यकबोधवानित्यनुभवस्य प्रामाणिकत्व
नेः । व्रीहिपरिच्छेदकसंदेहनिवृत्तेस्तु लक्षणाया अ
देन द्रोणपरिमितप्रकारकव्रीहिविशेष्यताकबोधा
प्युपपत्तेः । अन्यथा परिमाणप्रत्याख्यानं तैरपि व
माणं कथं सङ्गच्छेतेत्यलम् । यत्तु तद्धितार्थकदेवतार

भेदेन प्रकृत्यर्थेऽन्वेतीति तन्न। साध्य देवतेत्यत्र देवतायाः प्रकृत्यर्थेमाधित्वेन प्रत्ययार्थत्वाभावात् देवतावाचकात् प्रथमान्तात् षष्ठ्यर्थे प्रत्यय इति भवद्भिरन्यैश्च सूत्रार्थविवरणादिति॥

इति प्रथमा।

कर्तुरीप्सित—।

कर्तुरिति तस्य वर्त्तमान इति कर्त्तरि षष्ठी। यद्यपि कर्तृकर्मणोः कृतीति कृद्ग्रहणं तद्धितप्रयोगे षष्ठी मा भूदिति कृतम्। तेन व्याकरणं प्राज्ञ इत्यादौ न षष्ठी तथापि तस्येति षष्ठी तद्धितप्रयोगे वर्तत एव तच्च तदुत्पत्तौ बाधकाभावात्। एवं च गदमदेति सूत्रे यमग्रहणं पोरदुपधादिति यति सिद्धेऽपि सोपसर्गाद्यमेर्निवृत्त्यर्थमिति स्थिते त्वया नियम्येत्यादौ नियमे साधुरिति तद्धितो यदित्युक्ता कथं त्वयेति तृतीयेति पूर्वपक्षे केषाञ्चित् समाधानान्तराभिधानं व्यर्थमिति ध्येयम्॥

अकथितं च ।

दुह्याच्यर्थंरुधिप्रच्छिचिब्रूशासुजिकर्मयुक् । निह्नु-
ङ्मन्यवरुद्दण्डग्रहमुष्पचकर्मभाक् । अत्र केचित् ।
यत्तु द्विकर्मकेषु पचेरप्रामाणिकः पाठ इति प्रका-
शमनूद्य तद्भसादिति वचनं तदेव रभसकृतम् ।
भाष्यादिविरोधात् । तथा हि कर्तुरीप्सिततमं कर्मेति सूत्रे
तण्डुलानोदनं पचतीति प्रयोगोपपत्त्यर्थत्वात्तण्डुला-
नां विक्लेदने ओदनस्य कर्मत्वमिति भाष्ये व्युत्पादितम् ।
पचेर्द्विकर्मकत्वे तु किमेतद्गणनलक्षणेनेति । अत एव
प्रकृतसूत्रे करणाधिकरणयोस्तु पचादिरवकाशी न हि
तत्रास्य प्रसङ्गो दुह्यादिपरिगणनादिति हरदत्तः
कैयटोऽपि कर्मवत्सूत्रे दुहिपच्योरिति वार्त्तिके ओद-
नवरफलानि पच्यते इत्यत्र कर्तुरुदुम्बरस्य कर्मस्थक्रि-
यत्वाभावात् सकर्मकत्वाच्चाकर्मकत्वेऽप्राप्तेऽयं विधिरि-
त्युक्त्वा अन्यतमत्वेन द्विकर्मकः पचिः तेन कर्मणा तुल्य-
क्रियत्वेऽपि सकर्मकादेव सूत्रेणाप्राप्तिरित्युक्तम् ॥

उभसर्वतसोः । उभशब्देनोभयशब्दो लक्ष्य-
ते उभशब्दात्तसोऽसम्भवादिति प्राञ्चः । केचित्तु इत्थं
विषयेऽयच्प्रवृत्तावपि उभयशब्दाद्विहितो यस्तद्व-
दत्रेति यथाश्रुतं साध्विति । तन्न । इत्तिविषये अ-

प्रवृत्तिर्हि दृष्टेः प्राक् न तु पश्चात्। तथा सति साकच्काभयशब्दादयश्च उभकयपुत्र इति स्यात् वसहितात्तु उभयकपुत्र इति वैषम्यं स्यादिति काकचोर्नास्ति विशेषति सर्वादिसूत्रस्थोभयशब्दप्रत्याख्यायकभाष्यविरोधः। तु कथं धिङ् मूर्खेति सम्बोधनपदस्य क्रियान्वयस्य गौवोक्तितया धिक्शब्दप्रयोगाभावात्। क्रियापदं च चिच्छ्रुतं क्वचिदाश्चर्यमित्यन्यद्धेतत् तथाच मूर्खसम्बोध्यकं निषिद्धाचरणादि निन्द्यमित्यर्थ इति। न्न। सम्बोधनपदस्य क्वचित् क्रियान्वयित्वेऽपि सर्वत्र थात्वे मानाभावात्॥

कालाध्वनोः-।

मासस्य द्विरधीते। यत्तु क्त्वोर्थप्रयोग इति ष्ठीत्याहुस्तन्न। तत्र हि शेषग्रहणानुवृत्त्या द्विरह्नो ोजनमिति क्तदन्तेन समासनिवृत्तेरेव फलत्वात्। स्मात् षष्ठी शेष इति सूत्रेणैव षष्ठीति तत्त्वमिति। न्न। अनेन षष्ठीविधाने हि अस्याः षष्ठ्याः प्रतिपदधानत्वात् प्रतिपदविधाना षष्ठी न समस्यते समानिवृत्तिरिति क्त्वोर्थसूत्रविधायकत्वावश्यकत्वे तिङ्प्रयोगेऽपि परत्वादनेनैव षष्ठ्या उचितत्वात्। दुक्तम्॥

कारकैक्यंपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥ इति ।

इति द्वितीया ।

इति श्रीचक्रपाणिदत्तविरचिते प्रौढमनोरमाखण्डने
द्वितीयाकारकप्रकरणं समाप्तम् ॥

